शरीफ सालेमहंमद । वेरावल (जिल्ला काठियावाड)
अथवा दाउद शरीफ । भावनगर ॥
[ जिस ग्रंथनके आरंभमें * ऐसें चिन्ह हैं । वे ग्रंथ
पंडित दामोदर देवकृष्ण । गडसीसा ( जिल्ला
कच्छ ) इस ठिकानेसें बी मिल सकेंगे ॥ ]
(हमारे सर्वग्रंथोंका टपालखर्च नहीं पडेगा ।
मात्र वेल्युपेपेबलका डाककमीशन पडेगा॥)

श्रीपंचदशी सटीका सभाषा । द्वितीयावृत्ति रु. १०

सर्वविद्यानैं शिरोमणि श्री-वेदांतविद्याके सर्वश्रेष्ठग्रंथनमें यह ग्रंथ श्रेष्ठतर है ॥ वेदांत-विद्याका संपूर्णविज्ञान जो अनेकग्रंथनके अभ्याससें बी प्राप्त होता नहीं । सो मात्र एक पंचदशीग्रंथके श्रद्धापूर्वक अभ्यास कियेसें प्राप्त होवैहै ॥ यह द्वितीयावृत्तिमें नीचे लिखी अनेकप्रकारकी नवीन-ता करी है:- संपूर्ण-संस्कृत मूल औ टीका तथा तिनोंकी संपूर्णभाषा अरु

८३५ विस्तृतटिप्पण रखेहैं ॥ संस्कृतके प्रत्येक उत्थानिका अन्वय औ टीकाके आरंभमैं अंक दियेहैं औ। तिनके अनुसार भाषाके उत्थानिकाआदिककूं बी अंक दियेहैं। ऐसैं सर्वमिलिके ५६७८ अंक संस्कृतमैं औ तितनेंहीं भाषामैं रखेहैं ॥ मुख्य मध्य औ लघुप्रसंग ग्रंथके भाषाविभागमैं रखेहैं ॥ प्रसंगदर्शकानुक्रमणिका उपरांत एक वडी अकारादिअनुक्रमणिका। औ सर्वश्लोकनके पूर्वार्धके प्रथमअर्धकी अकारादिअनुक्रमणिका बी रखीहै ॥ ग्रंथके भीतरमैं भाषाकार ब्रह्मनिष्ठपंडितश्रीपीतांबरजीमहाराजकी तिनोंके हस्ताक्षरसहित यथास्थितचित्रितमूर्ति बिलायतसैं मंगवायके रखीहै ॥ इस ग्रंथकी जिल्द बी चढेगाचैसैं बिलायतसैं मंगवाईहै औ तिसपर संसारकी असारताके स्मरण करावनेहारे अनेकप्रकारके सार्थभ्रांतिचित्र औ सुवर्णादिकपट्प्रकारके रंगयुक्त "गजेंद्रमोक्ष" का चित्र दियाहै ॥ ग्रंथके अंतमैं श्रीमद्भागवतगत "गजेंद्रमोक्ष" संपूर्णमूल औ ब्रह्मनिष्ठपंडितश्रीपीतांबरजीमहाराजकृत अन्वयअंकयुक्तभाषासहित रखाहै ॥ गजेंद्रमोक्षके आरंभमैं "षट्दर्शनसारदर्शकपत्रक" औ ८ वें पृष्ठसैं श्रीपंचदशीकी अलौकिकमुद्रणशैलीविषै अर्वाचीनविद्वानोंके अभिप्राय छापेहैं ॥ उक्तअभिप्राय संक्षेपसैं श्रीविचारसागरके अंतमैं नाटकदीप है तिसके साथि बी दियेहैं ॥

श्रीपंचदशीमूलमात्र द्वितीयावृत्ति रु. १ इसमें मुख्य

औ मध्यप्रसंग संस्कृतमें रखेहैं । औ ग्रंथकी आदिविषै प्रसंगदर्शकअनुक्रमणिका रखीहै ॥ श्रीमद्विद्यारण्यस्वामीकृत उपनिषदोंका सारभूत पद्यात्मकअनुभूतिप्रकाशग्रंथ है। तिसमेंसें अद्भुतरसवाले २२१ श्लोक निकासिके इसीहीं ग्रंथके अंतविषै "अनुभूतिप्रकाशसारोद्धारः" नामसें रखेहैं ॥ तथा श्रीमद्भागवत । श्रीमद्भगवद्गीता । श्रीविवेकचूडामणि । आदिकवेदांतके प्रसिद्ध २० ग्रंथनमेंसें आल्हादकारकप्रकीर्णश्लोकनकूं वी इसी ग्रंथके अंतमें धरेहैं ॥ सुवर्णादिपंचरंग औ भ्रांतिचित्रयुक्त विलायतसें मंगवायके अतिसुंदर पूठे कियेहैं ॥

श्रीविचारसागर औ वृत्तिरत्नावली चतुर्थावृत्ति रु. ४ इस आवृत्तिमें अंकयुक्तपारिग्राफ (विभागन)की नवीनरूढी प्रविष्ट करीहै। तिससें ग्रंथके भिन्नभिन्नविषय । तिनोंका समानअसमानापना। उत्तरोत्तरक्रम। शंकासमाधान । दृष्टांतसिद्धांत औ विकल्प । दृष्टिपातमात्रसें विनाश्रम बुद्धिसें ग्राह्य होवैहै ॥ इस ग्रंथके उपरि ब्रह्मनिष्ठपंडितश्रीपीतांबरजी महाराज जिनोंकी यथास्थितचित्रितमूर्ति ग्रंथके आदि-

भागविषै रखीहै । तिनोंनैं ५५४ टिप्पण कियेहैं ये इस आवृत्तिकेलिये महाराजश्रीनैं कृपाकरिके पुनः संशोधन कियेहैं ॥ वृत्तिरत्नावलिनामक ब्रह्मनिष्ठपंडित श्रीपीतांबरजी महाराजकृत ग्रंथ जो तृतीयावृत्तिविषै दीयाथा । सो बहुत संशोधनसहित चतुर्थावृत्तिके अंतविषै बी रखाहै ॥ ग्रंथके भीतर अंकयुक्त प्रसंगदर्शकवाक्य। प्रसंगदर्शक औ बडीअकारादि अनुक्रमणिका। निर्गुणउपासनाचक्रकाचित्र। श्रीपंचदशीगत महावाक्यविवेक औ नाटकदीप । श्रीसुंदरविलासगत ग्रंथस्वप्रबोध तथा षट्दर्शनसारदर्शकपत्रक धरेहैं ॥ ग्रंथकी जिल्द सुवर्णादिअनेकरंगयुक्त गजेंद्रमोक्षके । भवसागर तथा विचारसागरके । औ भ्रांतिदर्शनके अनेकसार्थचित्रोंसैं अत्यंतसुशोभित औ आकर्षक करीहै ॥

श्रीविचारचंद्रोदय षष्ठावृत्ति रु १॥ षोडशकलायुक्त

यह ग्रंथ ब्रह्मनिष्ठपंडितश्रीपीतांबरजी-महाराजकरि स्वतंत्र रचित है ॥ ब्रह्म-साक्षात्कारविषे अवश्यउपयोगी ऐसी सर्वप्रक्रिया संक्षेपतें यामें है ॥ आदिसें अंतपर्यंत प्रश्नोत्तररूप है॥ इस आवृत्तिके लिये पूज्यमहाराजश्रीनें अनुग्रह करीके ग्रंथभाग औ टिप्पणभागका पुनः संशोधन कियाहै ॥ सुगमताअर्थ अंकयुक्त **पारेग्राफनकी नवीनरूढि** इस आवृत्तिमें वी है॥ प्रत्येक-कलाके आरंभमें **तिसका सारांश** पद्यमें दियाहै । जिसके कंठ करनेसें वे कलाका रहस्य सहज स्मृतिमें रहताहै॥ आरंभमें **अकारादिअनुक्रमणिका** औ अंतविषे षोडश-वींकलामें **लघुवेदांतकोश** है ॥ पूज्यमहाराजश्रीकी **यथा-स्थितचित्रितमूर्ति** तिनोंके **हस्ताक्षर** औ **विस्तृत-जीवनचरित्र**सहित ग्रंथारंभमें रखीहै॥ **भ्रांतिदर्शकचित्र-**आदिकनवीनतासें **पूंठे अतिसुंदर कियेहैं** ॥ जीवब्रह्मका भेद सत्य नहीं । किंतु मात्र उपाधिकृत है । यह महान-सिद्धांत इसग्रंथकी ११ वीं कलाविषे अनेकदृष्टांतसें निरूपण कियाहै । तिसकूं यथास्थित समजनेमें सहायभूत होवें ऐसे **चार चित्र** अतिश्रम औ खर्च करीके ग्रंथारंभमें छापेहैं ॥

**श्रीसुंदरविलास ज्ञानसमुद्र सुंदरकाव्य पंचमावृत्ति** । विपर्ययअंगकी संपूर्णटीकासहित । संक्षिप्ताकारसें । नवीनतायुक्त तैयार होतीहै ॥

**श्रीसटीका अष्टावक्रगीता तृतीयावृत्ति रु. १** इस ग्रंथरूपसैं महात्माश्रीअष्टावक्रमुनिनैं जनकराजाकूं उपदेश दियाहै ॥ आत्मानुभवोद्गारयुक्त स्पष्टवचन जैसे इस ग्रंथमें हैं तैसे अन्य कोई वी ग्रंथमें नहीं हैं ॥ इस ग्रंथमें **संपूर्ण-संस्कृत**मूल तथा टीका औ मूलका ब्रह्मनिष्ठपंडितश्रीपीतांबरजीमहाराजकृत सरल अरु विस्पष्ट **प्राकृतभाषांतर** है ॥ यह **तृतीयावृत्ति**में संस्कृतविभाग श्रीपंचदशीसटीकासभाषाकी अलौकिकरूढिसें छाप्याहै ॥ **"रिकाबमें चरण औ ब्रह्मउपदेश"** यह गाथा औ तिसका तादृशचित्र बडेयत्नसें इस आवृत्तिमें दियेहैं ॥ तदुपरांत **"आधुनिकविद्याविलास"** नामसैं वेदांतानुसारी २५ मनहरछंद दियेहैं ॥ श्रीपंचदशीके **प्रस्ताविक १७ श्लोक** अन्वयांकसहित रखेहैं॥

**श्रीवेदांतविनोद अंक ७ का रु. ०॥** इस नामवाले भिन्नभिन्न ७ लघुग्रंथ छापेहैं । तिसविषै वेदांतके **अनेकस्तोत्रआदिक** अन्वयांकयुक्त अर्थसहित रखेहैं ॥

***श्रीमनोहरमाला औ सर्वात्मभावप्रदीप रु. ० ॥=** स्वामीश्रीत्रिलोकरामजीकृत **मनोहरमाला** कवित्तमैं है ॥ तिनोंका विस्तृतजीवनचरीत्र वी ग्रंथारंभमैं रखाहै ॥

---

**सर्वात्मभावप्रदीप** ब्रह्मनिष्टपंडितश्रीपीतांबरजीमहाराजकृत वैतछंदमैं है ॥ उभयग्रंथनकी कविता सरल । प्रिय औ आत्मज्ञानकी बोधक है ॥ सर्वमिलिके ५५८ **टिप्पण** दियेहैं ॥

***वेदांतके मुख्यदशउपनिषद्**—संपूर्णमूलसहित औ मूलकी । श्रीशंकरभाष्यकी । औ आनंदगिरिटीकाकी ब्रह्मनिष्टपंडितश्रीपीतांबरजीमहाराजकृत भाषासहित बडेअक्षरोंसैं छपीहैं ॥ सर्वत्र गहनविषयकी टिप्पणोंसैं स्फुटता करीहै ॥ ये सर्वउपनिषद् सुवर्णके नामयुक्त जिल्दमैं बांधीहैं ॥

***ईशाद्यष्टोपनिषद् द्वितीयावृत्ति रु. ४**

***छांदोग्योपनिषद् रु. ६**

***बृहदारण्यकोपनिषद् तीनविभागमैं रु.१०**इसके आरंभमैं दशोपनिषदोंके तात्पर्यका निर्णायक ब्रह्मनिष्टपंडितश्रीपीतांबरजीमहाराजकृत "**श्रुतिषड्लिंगसंग्रह**"इस नामयुक्त लघुग्रंथ बी धर्याहै ॥

***श्रीमद्भगवद्गीता । चित्रितकपडेके पूंठेवाली रु. ४ औ सादेकपडेके पूंठेवाली रु. ३** इस गीताकी टीका ब्रह्मनिष्टपंडितश्रीपीतांबरजीमहाराजनैं बहुत सुगमता औ स्फुटतायुक्त रचीहै ॥ श्लोकनके पदच्छेद औ अन्वय नवीनरूढीसैं छापेहैं ॥ सर्वमिलिके ४५५ टिप्पण दियेहैं ॥

**श्रीवेदांतपदार्थमंजूषा द्वितीयावृत्ति** नवीनरूढियुक्त **तैयार होतीहै** ॥ मूलचंद्रज्ञानीकृत यह वेदांतकोशरूप

ग्रंथ वेदांतविषै उपयोगी पदार्थविवेचनका विशालभंडार है ॥

"સૉક્રેટિસનું જીવનચરિત્ર અને પ્લેટોનાં પ્રશ્નોત્તર" તૃતીયાવૃત્તિ છપાય છે.

ભાષાંતર કરનાર અલાદીન શરીફ સાલેમહંમદ.

આ લઘુ ગ્રંથમાં ગ્રીસદેશના વિદ્વાન અને તત્ત્વજ્ઞાની સૉક્રેટિસનું જીવનઆખ્યાન, તથા "શહેરીનો સ્વધર્મ" અને "માતાપિતા પ્રત્યે પુત્રનો મુખ્ય ધર્મ" એ નામક નીતિસૂચક બે સંવાદો આપેલા છે. આ ગ્રંથ ઈંગ્રેજ સરકારના કેલવણી ખાતાએ ઇનામ તથા લાઇબ્રેરીમાટે મંજૂર કર્યોછે.

---

"વિશ્વભેદ" અથવા

'૧૨૦૦૦ વર્ષ પૂર્વે હિંદુસ્થાન'

સ્વતંત્ર, ઐતિહાસિક, વેદાંતવિષયક, અપૂર્વ નવલકથા

કીંમત રૂ. ૦॥.

રચનાર- અલાદીન શરીફ સાલેમહંમદ.

આ ગ્રંથ વાર્ત્તારસની મધુરતા અને રચનાની અલૌકિકતાને લીધે આદિથી અંતપર્યંત વાચકના ચિત્તને એકસરખું આકર્ષી રાખેછે, અને સાનંદાશ્ચર્યમાં તલ્લીન કરી મૂકે છે. એટલુંજ નહીં પણ ધર્મ, નીતિ, અને તત્ત્વજ્ઞાન- (વેદાંત) ના અસરકારક બોધથી અંતઃકરણને વધારે નિર્મળ અને સુસંસ્કારવાન કરેછે. આ ગ્રંથને માટે વિદ્વજ્જનોએ ઉચ્ચ અભિપ્રાયો આપ્યા છે.

# ॥ श्रीअष्टावक्रगीता ॥

श्रीमद्विश्वेश्वरविरचितटीकासहिता

ब्रह्मनिष्ठपंडितश्रीपीतांबरकृतभाषायुक्ता च ।

तस्या इयं तृतीयावृत्तिः

मुमुक्षुजनहितार्थं

सालेमुहंमदनूरान्यात्मजशरीफाह्वयेन

मुंबापुर्यां

निर्णयसागराभिधमुद्रणयन्त्रालये बाळकृष्ण रामचंद्र

घाणेकर इत्यनेन मुद्रयित्वा प्राकाश्यं नीता ॥

॥ श्लोकः ॥

तावद्गर्जंति शास्त्राणि जंबुका विपिने यथा ॥

न गर्जंति महाशक्तिर्यावद्वेदांतकेसरी ॥ १ ॥

संवत् १९६६—सन् १९०९

## ॥ शार्दूलविक्रीडितम् ॥

संपूर्णं जगदेव नंदनवनं सर्वेऽपि कल्पद्रुमा
गांगं वारि समस्तवारिनिवहाः पुण्याः समस्ताः क्रियाः ।
वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी
सर्वावस्थितिरस्य वस्तुविषया दृष्टे परे ब्रह्मणि ॥ १ ॥

॥ ॐ गुरुदेवाय नमः ॥

# ॥ अथाष्टावक्रगीताप्रथमावृत्ति-प्रस्तावनिका ॥

वेदांतशास्त्रग्रंथेषु श्रीअष्टावक्रगीताना-
मको ग्रंथोऽतिप्रसिद्धोऽस्ति ॥ यद्यप्यस्मि-
न्ग्रंथे पंचदश्यादिवद्विशेषेणात्मानात्मादि-
विचारो न स्पष्टीकृतस्तथाप्यस्मिन्ग्रंथे मुमु-
क्षूणां ज्ञानिनां च संतोषकारकाणि स्वानु-
भवोद्गारयुक्तानि वचनानि यथोपलभ्यन्ते
न तथान्यग्रंथेषु॥ अस्य ग्रंथस्य हिंदुस्थानी-
भाषाटीका पूर्वमंकितास्ति तथापि सा श्री-
मद्विश्वेश्वरकृतसंस्कृतटीकासदृशी तत्त्व-
बोधकारिणी नास्तीति निश्चित्येमां सटीका-
ष्टावक्रगीतामंकयितुं प्रवृत्ता वयं ब्रह्मनिष्ठ-

श्रीपंडितपीतांवराभिधान् गुरून्स्वमनीषितं विज्ञापितवन्तः ॥

येषां जन्माखिलजगत्कल्याणपरंपराकारणमेवेहास्ति यैः सिद्धांतार्थवुभुत्सूनां मुमुक्षूणामनायासेनार्थवोधसिद्धये पंचदश्यादिग्रंथानां भापाटीका विरचितास्ति । उत च वेदांतसिद्धांतप्रतिपादका विचारचंद्रोदयाद्या नूतना ग्रंथाः संग्रंथिताः । तैः परमकृपयेमं सटीकमष्टावक्रगीताख्यं ग्रंथं संशोध्यानायासतो मूलार्थवोधिनीं भापाटीकां च विधाय तत्सहितोऽयं ग्रंथोऽस्मभ्यमंकनार्थमार्पितः ॥

शरीफ सालेमहंमद ॥

॥ ॐ गुरुदेवाय नमः ॥

# ॥ प्रथमावृत्तिकी भाषाप्रस्तावना ॥

वेदांतशास्त्रोंविषै यह श्रीअष्टावक्रगीता-ग्रंथ अतिशय प्रख्यात है॥ यद्यपि इस ग्रंथ-विषै पंचदशीआदिकग्रंथनकी न्यांई प्रक्रि-या विशेषकरिके हैं नहीं। तथापि मुमुक्षु औ ज्ञानीपुरुषोंकूं आनंद होवै। ऐसे अनुभवोद्गारयुक्त स्पष्ट वचन जैसै इस ग्रंथमैं हैं। तैसै अन्यग्रंथोंमैं क्वचित्‌हीं मिलेंगे ॥ हिंदुस्थानीभाषामैं इस ग्रंथकी टीका पूर्व छपीहै तथापि सो वेदांतविषै अतिउपयोगी नहीं है॥ इस ग्रंथकी संस्कृत-टीका मेरेकूं प्राप्त भई। सो देखिके बहुत-सत्संगीमित्रोंको इच्छा भई जो इसकूं छपाइ-के प्रगट करीचाहिये। तब मैंने ब्रह्मनिष्ठ-

पंडित श्रीपीतांवरजीमहाराजकूं प्रार्थना करी॥ उनोंका शरीर जगत्के कल्याणअर्थ-हीं उत्पन्न हुयाहै। सो उनोंके पंचदशी-आदिकग्रंथोंके भाषांतरकरि औ श्रीविचार-चंद्रोदयआदिक स्वतंत्रग्रंथोंकी रचनाकरि स्पष्ट होवैहै ॥ जीवोंके पुण्यप्रारब्धके वशतैं उक्तमहाराजश्रीजीनैं इस अतिउत्तम-ग्रंथकूं शोधन करी दिया औ संस्कृतविषै लघुमतिवालोंकूं शीघ्र संस्कृतका बोध होवै। ऐसा सुंदर संक्षिप्त मूलमात्रका हिंदुस्थानी भाषांतर करी दिया ॥

शरीफ सालेमहंमद ॥

॥ ॐ गुरुदेवाय नमः ॥

# ॥ तृतीयावृत्तिकी प्रस्तावना ॥

हमारे प्रसिद्ध कियेहुये ग्रंथोकी नवीन-आवृत्तिमैं नवीनता औ अधिकता करीके ग्रंथके उपयोगीपनैविषै अभिवृद्धि करनैकी इच्छातैं इस तृतियावृत्तिविषै हमनै जो विशेषता करीहै। सौ नीचे दिखावैहैं:—

१– प्रथम तौ इसआवृत्तिविषै संस्कृत औ भाषाविभागनकूं पृथक् पृथक् छापैहैं। तातैं संस्कृतके जिज्ञासुनकूं संस्कृतविभाग औ भाषाके जिज्ञासुनकूं भाषाविभाग अलग प्राप्त होवैगा ॥

२– श्रीपंचदशीसटिकासभाषाविषै जो अलौकिकमुद्रणशैलि हमनै प्रविष्ट करीहै

औ जिस मुद्रणशैलिकी प्रशंसा विद्वज्जनोंनैं करीहै । तिसीहीं शैलिसैं इसआवृत्तिका संस्कृतविभाग छापा गयाहै। तातैं संस्कृतके अभ्यासीनकूं अभ्यासविषै औ समजनै-विषै अत्यंतसुगमता होवैगी ॥

३– मूलश्लोक औ संस्कृतअन्वयके साथि भाषाविभाग मिलायके अवलोकन करनैकी जिनकी इच्छा होवै तिनोंकी सुग-मताअर्थ भाषाविभाग जो पृष्ठ २४१ सैं आरंभ होवैहै । तिसविषै प्रत्येकश्लोकके अर्थमैं अन्वयके अंक दिये गयेहैं । इतनाहीं नहीं परंतु मूलमात्रके अर्थदर्शक शब्दनकूं स्थूलाक्षरसैं छापेहैं ॥

४– परमपूज्यब्रह्मनिष्ठपंडितश्रीपीतांबर-जीमहाराज संवत् १९६१ के वैशाख कृष्ण-

पक्ष ७ गुरुवारके रोज परमधामकूं पहुंचे तिनोंनै मुमुक्षुनपर अनुग्रह करीके इस-आवृत्तिके लिये ग्रंथभागका पुनः सं-शोधन कियाथा ॥

५– आधुनिक पाश्चात्यविद्या (सायन्स) के विद्वानग्रंथकारोनैं पदार्थ ( मेटर )। अवकाश । प्रकाश । समय । गति औ ख-गोलआदिकविषै जे स्वतंत्रविचार प्रदर्शित कियेहैं। वे वेदांतके अभ्यासीनकूं अवलोक-नीय हैं।कारणकी तातैं यह अखिलसंसार-का अनादिपना । व्यभिचारिपना । असार-पना । औ कल्पितपना । जो वेदांतमतकूं मान्य है । सो अत्यंतस्फुट होवैहै ॥ आधु-निक पाश्चात्यविद्याके अनेकग्रंथनके अव-लोकनसैं मेरे मनविषै विचारका जो स्फुरण

भयाहै। ताके उद्धाररूप २५ छंद मैंनै यथामति रचेहैं। सो "आधुनिकविद्याविलास" नामसैं ग्रंथके अंतविषै छापेहैं ॥

६– यह श्रीअष्टावक्रगीतारूपसैं श्रीअष्टावक्रमुनिनै जनकनामकराजाकूं "रिकावमैं चरण औ ब्रह्मका उपदेश" इस प्रसंगसैं बोध दियाथा। ऐसी जो दंतकथा है सो मुमुक्षुनके आनंदअर्थ ग्रंथारंभमैं छापीहै औ तिस प्रसंगका सूचक एक तादृशउत्तमचित्र बी बडेखर्चसैं बनवायके इस आवृत्तिमैं धर्याहै ॥

७– श्रीपंचदशीके प्रस्ताविक १७ श्लोक अन्वयांकसहित ग्रंथके अंतमैं रखेहैं ॥

शरीफ सालेमुहम्मद नूरानी ॥

# ॥ श्रीअष्टावक्रगीतानुक्रमणिका ॥

॥ इति श्रीअष्टावक्रगीतानुक्रमणिका समाप्ता ॥

॥ श्रीअष्टावक्रगीता । तृतीयावृत्ति ॥

## ॥ जनकराजा औ श्रीअष्टावक्र-मुनिकी गाथा ॥

---

### ॥ रिकावमैं चरण औ ब्रह्मका उपदेश ॥

जन्ममरणरूप भवाहवाले यह संसाररूप दुस्तरसागरकूं उलंघन करीके मोक्षरूप पारकूं पहुंचावनैंविषै "ब्रह्मज्ञान" वा अन्य-शब्दमैं कहिये तौ "वेदांतविद्या" विना तौ अन्य कोईवी विद्या समर्थ नहीं है। यह सिद्धांतके निरूपणअर्थ श्रीमच्छंकराचार्यनै श्रीविवेकचूडामणिविषै कह्या है:—

न योगेन न सांख्येन कर्मणा नो न विद्यया।
ब्रह्मात्मैकत्वबोधेन मोक्षः सिद्ध्यति नान्यथा॥

ऐसैं होनैतैं महात्माजनोंनै यह ज्ञान-विद्याकूं अन्य सर्वविद्याओंमैं शिरोमणी कहीहै॥

श्रीकृष्णभगवाननैं वी श्रीमद्भगवद्गीता-विषै कह्याहै किः—

राजविद्या राजगुह्यं पवित्रमिदमुत्तमं ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं ॥

ऐसैं ब्रह्मज्ञानरूप विद्या सर्वविद्याओं-मैं पवित्र ओ सर्वोत्तम होनैतैं अतिदुर्लभ है औ सामान्यतः मनुष्यनकूं अनेक-जन्मांतरसैं प्राप्त होवैहै। ऐसा जो कथन शास्त्रकारोंनै कियाहै सो केवल वास्तविक है। कारणकी उत्तम मध्यम औ कनिष्ठ। ऐसैं अधिकारिनके तीनवर्गमैं जैसैं उत्तम-अधिकारिनकी संख्या अतिअल्प है। तैसैं कनिष्ठअधिकारिनकी संख्या अति-विस्तृत है॥ इसीहीं अर्थका सम्यक् निरू-पण श्रीकृष्णभगवाननैं श्रीगीताजीविषै नीचे दिये श्लोकसैं कियाहैः—

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥

शास्त्रकारोनैं ब्रह्मज्ञानकी प्राप्तिविषै सामान्यतः अनेकजन्मांतरकी जो आवश्यकता लिखीहै। सो कनिष्ठअधिकारिनके मलविक्षेपरूप आवरणोंकी निवृत्तिके दुःसाध्यपनेकी दृष्टिसैं लिखीहै। परंतु जिन अधिकारिनके मलविक्षेपरूप आवरण नष्ट भयेहैं। तिनोकूं तौ सर्वोत्तमसाधनोके सद्भावतैं इसीहीं जन्मविषै ब्रह्मज्ञान संभवेहै इतनाहीं नहीं। परंतु अतिशीघ्र कहिये ब्रह्मनिष्ठसद्गुरुके मुखसैं "तत्त्वमसि" आदिकमहावाक्यरूप महामंत्रके श्रवण करतैंहीं प्राप्त होई जावैहै ॥

जनकराजा उत्तमोत्तम अधिकारी भयेहैं। तिनोकूं अश्वारूढ होनैमैं एकरिकावमैं

चरण राखिके दूसरा चरण अन्यरिकाव-मैं पहुंचे। तितनै अल्पसमयमैं ब्रह्म-साक्षात्कार कैसैं भया। यह वार्त्ता हमारे परमकृपालु परमपूज्य ब्रह्मश्रोत्रीय ब्रह्म-निष्ठ सद्गुरु पंडितश्रीपीतांवरजीमहाराज-सैं श्रीअष्टावक्रगीताके व्याख्यानप्रसंगमैं वहुतवर्षोंके पूर्व हमनै श्रवण करीथी। सो यथास्मृति जिज्ञासुनके वोध औ आह्लाद-अर्थ हम नीचे वर्णन करैहैं:—

प्राचीनकालविषै एक अत्यंतवुद्धि-मान। राज्यकार्यमैं कुशल औ अनेकसद्गु-णोकरि अलंकृत ऐसा जनकनामक एक श्रेष्ठराजा राज्य करताभया॥ तिनकी राज्यसभामैं तिनके कुलगुरुका एक परम-आस्तिक ब्राह्मणपुत्र नित्य शास्त्रका श्रवण

करावताभया ॥ एकसमय उत्तमअधि-
कारीके प्रसंगमैं वे शास्त्रविषै "रिकाबमैं
चरण औ ब्रह्मका उपदेश" ऐसा वाक्य
वे कथाकारनै पठन किया ॥ इस वाक्यकूं
श्रवण करीके जनकराजा अत्यंत आश्चर्य
भये औ तिनोंनै वे ब्राह्मणपुत्रके प्रति प्रश्न
कियाः-हे महाराज! "रिकाबमैं चरण औ
ब्रह्मका उपदेश" यह शास्त्रका वाक्य सत्य
है वा असत्य है?

ब्राह्मणपुत्रनै प्रत्युत्तर दियाः- हे रा-
जन्! ये महापवित्रशास्त्रविषै जो कथन
है सो केवल यथार्थ है। तामैं आप किं-
चित वी शंकाकूं मति करौ ॥

जनकराजानै फेर कहाः- महाराज!
हमारी बुद्धिमैं तौ सो उक्ति केवल असंभ-

वित भासतीहै ॥ यदि वे कथन यथार्थ होवै तौ मैं इसी समय अश्व मंगायके आरूढ होऊं औ एकरिकाबमैं चरण धरिके अन्यरिकाबमैं दूसराचरण स्थित करूं तितनैं समयमैं आप मेरेकूं ब्रह्मोपदेश देके ताकी सत्यता प्रतिपादन करौ ॥

ब्राह्मणपुत्रनै उत्तर दियाः—हे राजन् ! यद्यपि शास्त्रवचन कदाचित बी असत्य होवै नहीं तथापि ताकी सत्यता आपकूं प्रतिपादन करनैका मेरेमैं सामर्थ्य नहीं है ॥

जनकराजानै फेर कह्याः—हे महाराज ! आपके जैसै विद्वानमैं तैसा सामर्थ्य नहीं है तौ वे वाक्यकी सत्यता कैसैं मानतैहो ? हम ऐसी अशक्यउक्तिकूं सिद्धिकरणके अभावतैं केवल कल्पनारचित गिनतैहैं ॥

यातें वे वाक्यकी सत्यता प्रदर्शित करनैकूं आप असमर्थ हो तौ वे वाक्यकूं छेदन करौ ॥

ब्राह्मणपुत्रनै राजाकूं किंचित् क्रोधायमान देखिके नम्रतासैं उत्तर दियाः—हे राजन्! शास्त्रोक्त पवित्रवचनकूं मैं कदाचित बी छेदन नहीं करुंगा। कारणकी उक्तवचनकी सत्यताविषै मेरेकूं लेश बी शंका नहिं है ॥

ऐसैं सुनिके जनकराजा अत्यंत क्रोधित भये ॥ तिनोंनै वे कथा करनैवालेकूं कारागृहविषै डार्या औ नगरके अन्य सर्वब्राह्मणोकूं कचेरीविषै आमंत्रण किये औ तिनोंके सन्मुख बी शास्त्रके उक्तप्रसंगकूं धरिके पूछ्याः— हे विद्वज्जनो! इस शास्त्रविषै

"रिकाबमैं चरण औ ब्रह्मका उपदेश" ऐसा वाक्य लिख्याहै सो क्या सत्य है?

सर्वजनोंनै एकध्वनिसैं उत्तर दिया कि सत्य है॥

जनकराजानै फेरि कह्याः– तौ यह अश्व तैयार है। तुमारेमैंसैं कोईमैं सामर्थ्य होवै तौ यह वार्त्ताकी सत्यता प्रत्यक्षप्रमाणसैं सिद्ध करौ। वा इस वाक्यकूं छेदन करौ॥

सर्वब्राह्मणोंनैं अपनी अशक्तता निवेदन करी औ शिक्षा सहन करैंगें परंतु वाक्यकूं कदाचित् वी छेदन नहीं करैंगे ऐसैं दृढतासैं कह्या॥

उक्तउत्तरकूं श्रवण करीके जनकराजानैं तिन सर्वब्राह्मणनकूं बंधनगृहविषै भेजें औ नगरके द्वारपालोंकूं आज्ञा करी की कोई वी

ब्राह्मण नगरमैं प्रवेश करै तिसकूं हमारे पास ले आवनां ॥ ऐसैं नगरविषै कोईवी नवीन ब्राह्मण प्रवेश करताथा तिसकूं जनकराजा उक्तप्रकारका प्रश्न करीके पीछे बंधनविषै डारता भया ॥ जनकाराजाका यह त्रासदायकवर्त्तन देशप्रदेशविषै प्रसिद्धि-कूं पाया। तातैं कोईवी ब्राह्मण तिनके नगरविषै प्रवेश करता नहीं था ॥ कित-नेक कालपीछे भाग्यवशात श्रीअष्टावक्र-मुनीका तिस नगर समीप आगमन भया॥ मुनिश्री नगरके वाहिर एकवृक्षके नीचे वैठिके विश्राम लेतेथे। तहां दो पंथिक ब्राह्मण वी आयके वैठै ॥

श्रीअष्टावक्र मुनीनैं तिनोंकूं पूछ्याः-
इस नगरविषै कोन राजा राज्य करताहै?

ब्राह्मणोनैं कह्याः—हे मुनि! आपकूं क्या प्रयोजन है? क्या आपकूं इसनगरमैं जानाहै?

अष्टावक्रमुनीनैं हा कह्या। तब वे ब्राह्मण कर जोडिके प्रार्थना करतेभये किः—हे मुनिवर! आप कृपा करिके नगरविषै कदाचित् बी प्रवेश नहीं करना। कारण कि इसनगरके राजा जनकका अत्यंत त्रास वर्त्तताहै॥ तिनोनैं अपनै दुराग्रहसैं अनेक ब्राह्मणनकूं बंधनगृहविषै डारेहैं। औ कोई बी नवीन ब्राह्मण दुर्भाग्यवशात् नगरविषै प्रवेश करताहै तौ तिसकूं वे राजा "रिकाबमैं चरण औ ब्रह्मका उपदेश" ऐसैं एक शास्त्रोक्त वचनकी सत्यता प्रत्यक्षप्रमाणसैं सिद्ध करनैकी आज्ञा

करताहै औ तैसैं सिद्ध न करै तौ तत्काल बंधनविषै डारताहै ॥

उक्तवार्ताकूं तिन पंथिकनसैं श्रवण करिके श्रीअष्टावक्रमुनी कहतेभये:— हम चलनेमैं असमर्थ हैं। तातैं तुम एक मंचमैं बिठायके हमारेकूं जनकराजाके सन्मुख लेचलौ तौ तिनकूं वे शास्त्रोक्तवाक्यकी सत्यता हम प्रतिपादन करी देवैंगे औ तातैं सर्वब्राह्मणनकूं बंधनसैं मुक्त बी करावैंगे ॥

अष्टावक्रमुनिका गंभीरता औ दृढतायुक्त कथन सुनिके वे पंथिकनकूं निश्चय भया कि मुनीश्वर ब्रह्मणोंका दुःख अवश्य निवारण करैंगे ॥ तिनोंनै त्वरित एकमंचविषै मुनिमहाराजकूं बिठाये औ जनकराजाके समीप राज्यसभामैं लेगये ॥

अष्टावक्रमुनिकी भव्य औ तेजस्वी मुख-मुद्रा देखिके जनकराजाकूं तत्काल तिनोके प्रति पूज्यबुद्धि उत्पन्न भई॥ राजानै साष्टांग-नमस्कार करीके औ उभयकर जोडिके प्रार्थना करीः– हे मुनीश्वर! किस प्रयोजन-अर्थ आपका यहां आगमन भयाहै। सो कृपा करिके कहो ॥

अष्टावक्रमुनिनै कह्याः– हे राजन्! किस अपराधके लिये तुमनै ब्राह्मणोंकूं कारागृह-विषै डारेहैं?

जनकराजानै उत्तर दियाः–हे मुनिवर! "रिकाबमैं चरण औ ब्रह्मका उपदेश" ऐसी शास्त्रोक्त काल्पनिकउक्तिकूं वे सर्व-ब्राह्मण प्रतिपादन करनैकूं असमर्थ हुये बी तिसकी यथार्थताविषै दुराग्रहकूं करतेहैं॥

अष्टाः— हे राजन् ! तुमारा तर्क यथान्याय नहीं है ॥ तिनोंकी प्रतिपादन करनेकी अशक्तितें वे वाक्यका काल्पनिकपना सिद्ध नहीं होताहै ॥ मैं प्रतिज्ञा करताहूं कि "रिकावमैं चरण औ ब्रह्मका उपदेश" यह शास्त्रोक्तवचन मिथ्या नहीं है। किंतु अक्षरसह केवलसत्य है ॥

जनकः— हे मुनिओंविषै श्रेष्ठ ! आप आज्ञा करौ तौ मैं अश्वकूं मंगाउं ॥ आप कृपावधि करिके मेरेकूं तिसप्रकारसैं ब्रह्मोपदेश करौ औ उक्त वाक्यकी सत्यता मेरेकूं प्रतिपादन करौ। ऐसी मेरी नमनयुक्त प्रार्थना है ॥

अष्टाः— हे राजन् ! मैं तुमारा शुभभाव देखिके प्रसन्न हुवाहूं ॥ तुमारेकूं कदाचित्

ज्ञात नहीं है कि ब्रह्मज्ञानरूप पवित्र उप-
देश अपात्र जनोंकूं दिया जाता नहीं।
औ देवैं तौ अपात्रकूं तासैं किंचित् बी
लाभ होता नहिं ॥ तातैं हे राजपुत्र !
तुमारेकूं ब्रह्मोपदेशकी यदि अभिलाषा होवै
औ हमारेविषै पूर्णश्रद्धा होवै । तौ बंधन-
विषै डारेहुवे ब्राह्मणनकूं प्रथम मुक्त करौ
औ पीछे अश्वारूढ होइके हमारे संग
वनविषै चलौ ॥ तहां एकांत औ निर्जन-
स्थलविषै मैं तुमारी पात्रताकी परीक्षा करी-
के वे शास्त्रोक्त वचन सिद्ध होवै तिस
प्रकार तुमारेकूं ब्रह्मका उपदेश करूंगा ॥

अष्टावक्रमुनिकी दृढतायुक्त वाणी श्रवण
करीके जनकराजाकूं तिनोकेविषै परम-
आस्था उत्पन्न हुई ॥ जनकराजानैं तत्काल

सर्वब्राह्मणोंकूं बंधनगृहसैं मुक्त करनैकी आज्ञा करी ॥ आप अश्वारूढ भये। औ मुनिवरकूं एक उत्तममंचिलविषै आरूढ करिके। प्रधान । सैन्याधिपति आदिक राज्यमंडल औ प्रतिष्ठित प्रजाजनोंसहित वनविषै पहुंचे ॥ तहां एक घनघटावाले वटवृक्षके नीचे किंचितकाल विश्राम करीके जनकराजानैं सर्वराज्यमंडल औ प्रजाजनोकूं नगरविषै चलै जानैकी आज्ञा करी। तातैं वे सर्व नगरविषै शीघ्र पीछे पधारनैकी विज्ञप्ति करिके तहांसै विदाय भये ॥

जब मुनि औ राजा एकाकिन रहे। तब जनकराजा अष्टावक्रमुनिकी आज्ञा लेके अश्वकी एकरिकावमैं चरणकूं स्थित करीके आरूढ होनैकूं तत्पर भये ॥ इससमय

अष्टावक्रमुनीनै अपनै हाथसैं धैर्य रखनैंकी संज्ञा करी ( देखो ग्रंथारंभमैं दिया चित्र ) औ कहाः- हे राजपुत्र! दूसरा चरण उठानैंसै पूर्व हमारे प्रश्नोंके उत्तर देओ ॥

जनकः- आज्ञा महाराज!

अष्टावक्रः- "रिकावमैं चरण औ ब्रह्मका उपदेश" यह एकहीं वाक्य उक्तशास्त्रविषै लिख्या है? वा कछु अन्यवार्त्ता वी लिखी है?

जनकः- अन्य तौ बहुत वी लिखाहै ॥

अष्टाः- तिस शास्त्रविषै ब्रह्मज्ञानके लिये कोई गुरु करना चाहिये ऐसा विधान है वा नहीं?

जनकः- हा महाराज। गुरु करनैकी आवश्यक्ता विधान करीहै ॥

अष्टाः– तब हे राजन्! तुम मेरेकूं अपनै गुरु किये विना क्या उपदेश लेनैकूं इच्छतेहो?

जनकः– नहीं महाराज। मैं शास्त्रविधिपूर्वक उपदेश लेनैकूं उत्सुक हूं औ तातैं मैं आपकूं मेरा गुरु स्थापित करताहूं॥

अष्टाः– उक्तशास्त्रविषै गुरुके प्रति कुछ दान देनैका लिखाहै?

जनकः– हां महाराज। मैं इसीहीं क्षण प्रतिज्ञा करिके शास्त्रवचनानुसार मेरा तन मन औ धन। ये तीनों आपके चरणकमलमैं अर्पण करताहूं॥ यातैं हे भगवन्! अब अनुग्रह करिके मेरे तांई ब्रह्मका उपदेश करौ॥

अष्टावक्रमुनि। राजपुत्रकी उक्तप्रतिज्ञा

मुनिके तहांसैं दूर गमन करीके कोई गुफा-
विषै स्थित भये ॥ औ जनकराजा तौ
अश्वकी एकरिकाबविषै जैसै चरण राखिके
खडे थे तैसैंहीं तिसीहीं स्थलविषै गति-
रहित स्थित रहे ॥

सूर्यास्त होनैका समय समीप आया तौ
बी जनकराजा नगरविषै पुनः आये नहीं ।
तब प्रधानादिकराज्यमंडल अत्यंतचिंताग्रस्त
भये औ तत्काल वनविषै गये ॥ तहां देखा
तौ एक विशालवृक्षके समीप अष्टावक्रमुनि-
वाली मंचिल पडीथी । परंतु मुनिराज
कहींबी दृष्टिगोचर भयें नहीं औ जनक-
राजा तौ अपनै अश्वकी एकरिकावमें चरण
राखिके चेतनरहित प्रतिमाकी न्यांई खडे
थे ॥ यह देखिके प्रधानआदिकसर्व अत्यंत-

भयकूं पाये ॥ प्रधान त्वरित राजाके सन्मुख गया। परंतु जनकराजानै तिसके तांई दृष्टि बी करी नहीं। तब प्रधाननै उभयकर जोडिके विज्ञप्ति करी कि हे राजन्! ऐसैं किस कारण खडे हो औ क्या स्थिति है? परंतु जनकराजानै यत्-किंचित् बी जब उत्तर दिया नहीं तब सर्वनै निश्चय किया कि राजाके तांई मुनिनै कछु मंत्रयोग कियाहै ॥ अल्पसमयपर्यंत मुनिकूं वहां ढूंढे। परंतु समीपमैं कहीं मिलै नहीं। तब निराश होइके राजाकूं वहांसैं उठायके नगरविषै ले आये औ राजमहल-विषै एक उत्तमशय्यामैं सुलाये औ अनेक आश्विकनकूं मुनिकी शोधअर्थ वनविषै जानैकी औ मुनि जहां बी होवै

वहांसैं तिनकूं लाये विना पुनः नहीं आनेकी तिनोंकूं दृढ आज्ञा करी ॥ राजा तौ तिनोकूं जिस स्थितिमैं शयाविषै डालेथे। तिसींहीं स्थितिमैं पडे रहे ॥ तिनोंनै न हस्त हिलाया। न चरण हिलाया। कि न एक वी शब्दका उच्चार किया ॥ भोजनकी थालीयां लाके राजाके सन्मुख धरी। परंतु राजानै कछु वी ग्रहण किया नहीं ॥ जलपात्र राजाके मुखकूं धर्या परंतु राजानै यत्किंचित् वी पान किया नहीं ॥ राजाकी यह स्थिति देखिके राणीयां औ राजमंडल अत्यंतशोकनिमग्न भये औ यह वार्ता जब प्रजाजनोंनै जानि तब अखिलनगरविषै होहाकार हो रह्या ॥ अतिदुःखपूर्वक रात्रि व्यतीत भई औ सूर्योदय भया । परंतु

मुनिका कहीं वी पत्ता मिला नहीं ॥ जव सूर्यास्त हुवा तव एक सिपाई अष्टावक्र-मुनिकूं ले आया ॥

मुनिकूं देखिके प्रथम तौ प्रधानके हृदय-मैं अत्यंत क्रोध प्रज्वलित भया। परंतु मुनिकूं क्रोधायमान करनैसैं कार्यसिद्धि नहीं होवैगी औ विपरीत परिणाम होवैगा। ऐसैं विचारिके नम्रतायुक्त प्रश्न किया:-हे मुनिवर! हमारे राजाकूं आपनै मंत्रवलसैं क्या कियाहै?

मुनिनै उत्तर दिया:-तुमारे राजाउपर मंत्रप्रयोग करनैसैं हमारेकूं क्या प्रयोजन है? हमनै तौ तुमारे राजाके तांइ कछुवी नहीं कियाहै॥ तुम खुद राजाकूं क्यूं पूंछते नहीं?

राजा कछु वी उत्तर देते नहीं औ दोदिनसैं उपवासी हैं। आदिक सर्वस्थिति प्रधाननैं मुनिके तांई कहीके विज्ञप्ति करी कि "हे मुनिवर! हमारे राजा भोजन करै ऐसैं करो" ॥

अष्टावक्रमुनिनै तत्काल कहाः—क्यूं जनक!

जनकः—आज्ञा महाराज!

अष्टाः—हमनै तेरेप्रति कुछ कीयाहै?

जनकः—नहीं महाराज॥ कौन कहताहै?

अष्टाः—जनक! तव क्यूं सोया पडाहै? आनंदसैं बैठ औ यह भोजन धर्याहै। सो भक्ष करीके क्षुधाकी तृप्ति कर॥

जनकराजा तत्काल बैठीके भोजन करनै लगै। सो देखिके सर्व कोई सानंदाश्चर्यमैं तल्लीन भये॥ भोजनकी समाप्ति होतेहीं

जनकराजा गतिरहित स्थित रहे। तातैं प्रधाननै पुनः विज्ञप्ति करीः—हे मुनिवर! कृपा करिके हमारे राजाकी स्थिति प्रथमके जैसी करौ ॥

यह सुनिके मुनिनै प्रधानआदिकसर्वकूं अपनै अपनै गृहविषै जानैकी आज्ञा करी औ आप एकाकिन् औ आंतरसैं द्वार वंध करीके जनकके समीप रहे॥ जव सर्व कोई चले गये तव अष्टावक्रमुनिनै जनककूं पूछ्याः—

हे राजन्! ऐसैं चेष्टारहित क्यूं हुवाहै?

जनकः-गुरुमहाराज! यह हाथ अव मेरे नहीं है। यह चरण मेरे नहीं है। यह जिव्हा वी मेरी नहीं है॥ यह चक्षु कर्ण आदिक कोई इंद्रियां मेरी नहीं है॥ यह राज्य वी मेरा नहीं है॥ संक्षेपतैं मेरा

कछु बी नहीं है ॥ यह तन मन औ धन-आपकूं सत्यप्रतिज्ञासैं मैंनैं अर्पण किये-हैं। तातैं यह सर्व अब आपकाहीं है ॥ आ-पकी आज्ञाविना मैं यत्किंचित् बी चेष्टा वा व्यवहार करनैकूं पात्र नहीं हूं ॥

जनकके अत्यंतश्रद्धायुक्त यह वचन सुनिके अष्टावक्रमुनि अत्यंत प्रसन्नताकूं पाये॥ तिनोनै जनकके मस्तक उपरि अपना हाथ फिरायके कह्याः—

बच्चा जनक! मुमुक्षु किस प्रकारसैं ज्ञानका अधिकारी है तन्की प्रथम परीक्षा करनी आवश्यक है भोजः तेरी परीक्षा करताथा॥ मेरी अब खी का भई है कि तूं ज्ञानका उत्तमोत्तमअधिकारी है॥ "रिकाब-मैं चरण औ ब्रह्मका उपदेश" मात्र तेरे

जैसै अधिकारीकूंहीं संभवैहै। तातैं "हे पुत्र! तूं निश्चय कर कि तूं आपहीं ब्रह्म-स्वरूप है ॥ तूं सदासर्वदा मुक्तहीं है ॥ तूं कृतकृत्य औ प्राप्तप्राप्य है ॥ औ तूं अ-खंड सुखरूपहीं है ॥"

यह सुनिके जनकराजा संकल्प करता-भया कि मैं तौ परिच्छिन्न हूं। विकारी हूं। अज्ञानी हूं। तातैं ब्रह्मरूप कैसैं संभवुं। ऐसैं विचारीके जनकराजानै मुनिवरके प्रति प्रश्न किया:—"कथं ज्ञानमवाप्नोति........

यहांसैं अष्टावक्रगीताका आरंभ होवैहै॥

अष्टावक्रमुनिनै वे प्रश्नोका उत्तर दिया ॥ इसरीतिसैं यह श्रीअष्टावक्रगीताविषै दिये प्रश्नोत्तर। उपदेश औ आनंदोद्गारमैं सारी रात्रि व्यतीत भई ॥ जब सूर्योदय भया

औ आंतरगृहके द्वार खोले गये। तब प्रधानादिक सर्वराज्यमंडलनैं आज्ञा मांगिके नमनसहित प्रवेश किया औ जनकराजाकूं आनंदनिमग्न देखिके हर्षकूं पाया ॥

इससमय अष्टावक्रमुनिनैं जनककूं पूछ्याः—

हे राजन्! "रिकावमैं चरण औ ब्रह्मका उपदेश" यह वचनविषै यदि तेरेकूं शंका हो तौ अश्वकूं लानैकी आज्ञा कर ॥

जनकः—हे भगवन्! अब मेरै हृदयमैं किंचित्मात्र वी शंका नहीं है ॥ शास्त्रका वे वचन केवल सत्य है औ मैं आपकी अपरिमितदयासैं कृतार्थ हुवाहूं ॥

॥ इति जनकराजा औ श्रीअष्टावक्रमुनिकी गाथा समाप्त ॥

॥ श्रीगुरुपरमात्मने नमः ॥

# ॥ ॐ सटीकाष्टावक्रगीता ॥

## ॥ आत्मानुभवोपदेशवर्णनं नाम प्रथमं प्रकरणम् ॥ १ ॥

### ॥ अथ टीकाकारकृतमंगलाचरणम् ॥

सच्चिदानंदमद्वैतं सर्वाधिष्ठानमुत्तमम् ।
नत्वाष्टावक्रसूक्तस्य दीपिका तन्यते परा ॥ १ ॥

॥ जनक उवाच ॥

कथं ज्ञानमवाप्नोति कथं मुक्तिर्भविष्यति ।
वैराग्यं च कथं प्राप्तमेतद्ब्रूहि मम प्रभो ॥ १ ॥

१] प्रभो ज्ञानं कथं अवाप्नोति । मुक्तिः कथं भविष्यति च वैराग्यं कथं प्राप्तं एतत् मम ब्रूहि ॥ १ ॥

२ इह खलु ज्ञानविज्ञानसंपन्नः परमकारुणिको-ऽष्टावक्रमुनिः मुक्तिकामनया समुपेतं कंचिच्छिष्यं शमदमाद्यधिकारस्वीकारोपदेशपूर्वकमात्मतत्त्व-मुपदिशति—

## ॥ अष्टावक्र उवाच ॥

३मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज ।
६क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥ १ ॥

३] तात चेत् मुक्तिं इच्छसि।विषयान् विषवत् त्यज॥

४) तात इति सानुग्रहसंबोधने । हे शिष्य ! त्वं सर्वानर्थनिवृत्तिं परमानंदावाप्तिरूपां मुक्ति-मिच्छसि चेत् । तर्हि विषयान्विषवत्त्यज । यथा विषं अनर्थहेतुत्वात्त्यज्यते तथा विषयान् देहादीननर्थहेतुभूतांस्त्यज । तत्राहं ममेत्यध्यासा-सक्तिं मा कार्षीरित्यर्थः ॥ अनेन बाह्यपदार्थानु-षंगत्यागोपदेशेन बाह्येंद्रियनिग्रहरूपदमांगीकार उपदिष्टः ॥

५अथांतःकरणनिग्रहरूपशमांगीकारमुपदिशति-

६] क्षमार्जवदयातोपसत्यं पीयूषवत् भज ॥

७) **क्षमा** नाम सर्वसहनं सर्वाधिष्ठानत्वमात्म-धर्मः । **आर्जवं** नाम अविद्यारूपकुहकसंबंधाभावः सोऽप्यात्मधर्मः । **दया** नाम निरुपाधिकं सर्व-हितानुबंधित्वं सोऽप्यात्मधर्मः । **तोषो** नामात्मसुखं तदप्यात्मस्वरूपं । **सत्यं** नाम कालत्रयाबाध्यं स्वरूपं तदप्यात्मैव । एवंविधमात्मरूपं **पीयूष-वद्भज** ॥ क्षमादिकं । यथा पीयूषं अर्थहेतुत्वात् सेव्यते तथा सेवस्वेत्यर्थः ॥ शमदमादिसाधनचतु-ष्टयसंपन्नमधिकारिणं शिष्यं प्रति भगवानष्टावक्रो मुनिर्मुक्तिमुपदिशति ॥ १ ॥

८ ननु पांचभौतिको देह एवात्मा । तथा च भूतानां तद्धर्माणां च त्यागो न संभावितः । न हि पृथिव्यादीनां स्वभावभूतो गंधादिः कालत्रयेऽपि त्यज्यत इत्याशंक्य । पृथिव्यादिस्वरूपस्त्वं न भवसीत्याह—

**न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान्।**
**एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये॥२॥**

९] भवान् पृथ्वी न । वा जलं न । अग्निः न । वायुः न । द्यौः न ॥

१०) हे शिष्य । पृथिव्यप्तेजोवाय्वाकाशादिरूपस्त्वं न भवसि । ततस्त्वमनात्मधर्मान्विषयांस्त्यजेत्यर्थः ॥

११ नन्वहं गौरः स्थूलः कृष्णो ह्रस्व इत्यादिप्रतीतेः पांचभौत्तिको देह एवात्मा इत्यत आह—

१२] एषां साक्षिणं आत्मानं ॥

१३) एषां देहादीनां साक्षिणं एव आत्मानं विद्धि साक्षात्कुरु । तथा च । देहादेः साक्षी आत्मा देहादिभ्यो भिन्नः । यथा घटद्रष्टा घटाद्भिन्नस्तथेत्यर्थः ॥

१४ नैयायिकाभिमतमात्मानं निराकरोति—

१५] चिद्रूपे ॥

१६ आत्मज्ञानस्य फलमाह—

१७] चिद्रूपं विद्धि ॥ २ ॥

ooooooooooooooooooooooooooooooo

१८ आत्यंतिकी दुःखनिवृत्तिर्मुक्तिरिति नैया-यिकाः। दुःखप्राग्भावपरिपालनं मुक्तिरितिप्राभाकराः। आत्महानिर्मुक्तिरिति बौद्धाः । इत्यादिमतानि निराकुर्वन्नेव आत्मज्ञानाज्जीवन्मुक्तिदशामाह—

यदि देहं पृथक्कृत्य चिति विश्राम्य तिष्ठसि ।
अधुनैव सुखी शांतो बंधमुक्तो भविष्यसि॥३॥

१९] यदि देहं पृथक् कृत्य चिति विश्राम्य तिष्ठसि अधुना एव सुखी शांतः बंधमुक्तः भविष्यसि ॥

२०) हे शिष्य । यदि त्वं देहं पृथक्कृत्य देहादिभ्यो विलक्षणं विविच्य । चिति विश्राम्य चिदेकाग्रो भूत्वा तिष्ठसि । तर्हि त्वं अधुनैव इदानीं जीवनदशायामेव । सुखी प्राप्तपरमानंदः । अत एव शांतः सुप्रसन्नमनाः । बंधमुक्तः कर्तृत्व-भोक्तृत्वप्रमुखानर्थरहितो भविष्यसि इत्यर्थः ३

ooooooooooooooooooooooooooooooo

२१ ननु वर्णाश्रमप्रयुक्तानि कर्माणि विहाय । चिति विश्राम्यावस्थानं कथं मुक्तिरित्याशंक्यात्मा वर्णाश्रमविलक्षण इत्याह—

**न[२२] त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः[२३]**
**असंगोऽसि निराकारो विश्वसाक्षी सुखी भव४**

२२] त्वं विप्रादिकः वर्णः न । आश्रमी न ॥

२३) त्वं वर्णाश्रमविलक्षण इत्यर्थः ॥

२४ नन्वहं ब्राह्मण इत्यादि चाक्षुषप्रत्यक्ष-
बलादात्मैव वर्णाश्रमीत्याशंक्याह—

२५] अक्षगोचरः न ॥

२६) साक्षित्वात् अयं ब्राह्मण इत्यादि प्रत्य-
यास्तु देहगोचरा एव । न त्वात्मगोचरास्तस्येंद्रि-
यकज्ञानागोचरत्वादित्यर्थः ॥

२७ तर्हि कीदृशोऽहमित्याशंक्यात्मानं निरूप-
यन्नेव तद्विश्रांतिफलमनुवदति—

२८] असंगः निराकारः विश्वसाक्षी असि सुखी भव॥

२९) असंगः सर्वोपाधिसंगरहितः । निरा-
कारो विश्वसाक्षी त्वं असि । अतश्चासंगादि-
रूपस्य तव वर्णाश्रमविलक्षणत्वात् । कर्मासक्तिं
परिविहाय । चिति विश्राम्य । सुखी प्राप्तपरमा-
नंदो भव इत्यर्थः ॥ ४ ॥

३० ननु वेदोदितं कर्म विहाय । चिति विश्रांतावपि प्रत्यवायप्रसंग इत्याशंक्याह—

३१ धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो ।
३४ न कर्तासि न भोक्तासि मुक्त एवासि सर्वदा ५

३१] विभो धर्माधर्मौ सुखं दुःखं मानसानि। ते न॥

३२) धर्माधर्मादयो मनोधर्मा एव । कालत्रयेऽपि तैः सह तव संबंधो नास्तीत्यर्थः ॥

३३ कुत इत्यत आह—

३४] कर्ता न असि। भोक्ता असि न। सर्वदा मुक्त एव असि ॥

३५) किं च । विहितनिषिद्धकर्मकर्तुः धर्माधर्मादिद्वारा सुखदुःखभोक्तृत्वं । तदपि तव नास्ति शुद्धबुद्धस्वरूपत्वात्त्वं सर्वदा मुक्त एवासि । अज्ञानमात्रविजृंभिते सुखदुःखे ते तु चिति विश्रांत्यैवाज्ञाननिवृत्त्या न विजृंभिष्येतेत्यर्थः ॥ ५ ॥

३६ ननु शुद्धबुद्धस्वभावस्यैतस्य नित्यमुक्त-स्यात्मनो बंधः किंनिबंधनो । यस्य निर्बंधस्य निवृत्त्यर्थं विवेकिनो यतंत इत्याशंक्य । नित्य-मुक्तस्यापि प्रातीतिकं बंधमनुवाद—

एको द्रष्टासि सर्वस्य मुक्तप्रायोऽसि सर्वदा ।
अयमेव हि ते बंधो द्रष्टारं पश्यसीतरम् ॥६॥

३७] सर्वस्य द्रष्टा असि।एकः सर्वदा मुक्तप्रायः असि॥

३८ ) हे शिष्य । सर्वस्य द्रष्टा प्रतिशरीरं एकः त्वं असि । ततश्च व्यापकत्वात् सर्वदा मुक्तप्रायोऽसि । देहाद्यासवशतो बंधे प्रतीय-मानेऽपि वस्तुगत्या मुक्तोऽसीत्यर्थः ॥

३९] अयं एव हि ते बंधः। इतरं द्रष्टारं पश्यसि ॥

४०) हि निश्चितं । अयमेव ते तव बंधो । यदि इतरं देहादिरूपं परिच्छिन्नं द्रष्टारं पश्यसि इत्यर्थः ॥ ६ ॥

४१ पूर्वं वंधहेतुरुक्त अथानर्थहेतुं वदन्नेव तन्निवृत्तिपरमानंदप्राप्त्युपायमनुवदति—

**अहं कर्त्तेत्यहंमानो महाकृष्णाहिदंशितः ।**
**नाहं कर्त्तेति विश्वासामृतं पीत्वा सुखी भव॥७॥**

४२] अहं कर्त्ता इति अहंमानः महाकृष्णाहिदंशितः । अहं कर्त्ता न इति विश्वासामृतं पीत्वा सुखी भव ॥

४३) हे शिष्य । अहं कर्त्तेति एवंरूपो योऽहंमानः अहमित्यात्मनि कर्तृत्वाभिमानस्तद्रूपो महान् कृष्णसर्पः सुखदुःखविपयावहस्तेन दंशितः कवलीकृतोऽतःकारणात् । अहं न कर्त्ता अहं अकर्त्ता आत्मा । इत्येवंरूपं विश्वासामृतं निश्चयामृतं । पीत्वा अनुभूय । सुखी भव प्राप्तपरमानंदो भवेत्यर्थः ॥ ७ ॥

४४ तत्त्वज्ञानाज्ञानपरं किञ्चिद् सुखसाधन-मित्याशंक्याज्ञानकाननदहनद्वारा ज्ञानाग्निः सुख-साधनमित्याह—

एको विशुद्धबोधोऽहमिति निश्चयवह्निना ।
प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव॥८॥

४५] एकः विशुद्धबोधः अहं इति निश्चयवह्निना प्रज्वाल्य अज्ञानगहनं । वीतशोकः सुखी भव ॥

४६) एकः सजातीयविजातीयस्वगतभेद-रहितः । विशुद्धबोधः स्वप्रकाशचिदात्मा अह-मिति निश्चयाग्निना। अज्ञानाख्यं गहनं वनं। प्रज्वाल्य प्रकर्षेण दग्ध्वा। शोकमोहरागद्वेषप्रभृति-जन्मापायात् वीतशोको विगतदुःखः सन् । सुखी भव इत्यर्थः ॥ ८ ॥

४७ नन्वात्मज्ञानेन अज्ञानकाननदाहे सत्यपि सत्यस्य प्रपंचस्य ज्ञानादनिवृत्तेः वीतशोकः कथं स्यादित्याशंक्य । प्रपंचस्य रज्जुभुजंगतुल्यत्वाज्ज्ञानाद्विनिवृत्तौ दुःखहेतोरभावाद्वीतशोकता स्यादेवेत्याह—

यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत् ।
आनंदपरमानंदः स बोधस्त्वं सुखं चर ॥ ९ ॥

४८] यत्र इदं विश्वं रज्जुसर्पवत् कल्पितं भाति सः बोधः त्वं सुखं चर ॥

४९) यत्र बोधे । इदं विश्वं रज्जुसर्पवत् कल्पितं अधिष्ठानाज्ञानकल्पितं भाति । स बोधः चिदात्मा त्वं सुखं चर । यथा स्वप्नदशायामज्ञानकल्पितं व्याघ्रादिकं पश्यति । जाग्रद्बोधे निवर्त्य सुखं चरति । तद्वदित्यर्थः ॥

५० ननु दुःखहेतुप्रपंचनिवृत्तौ दुःखाभावमात्रं स्यात्सुखं तु कथं स्यादित्याशंक्य । स्वभावत एव

त्वं नित्यानंतानंदस्वरूप इत्याह—

५१] आनंदपरमानंदः ॥

५२) आनंदेभ्यो मनुष्यलोकदेवलोकानंदेभ्यः परम उत्कृष्टः आनंदस्त्वमित्यर्थः ॥ "एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति" इति श्रुतेः ॥ ९ ॥

ooooooooooooooooooooooooooooooooo

५३ ननु सर्वं रज्जुसर्पवत्कल्पितं स्वभावतस्त्वानंद एवात्मेति चेत्तर्हि बंधमोक्षावात्मनः किंनिबंधनावित्याशंक्याह—

मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्यपि।
किंवदंतीह सत्येयं या मतिः सा गतिर्भवेत् १०

५४] मुक्ताभिमानी मुक्तः हि बद्धाभिमानी अपि ॥

५५) हि निश्चितं मुक्ताभिमानी मुक्तः। अपि च बद्धाभिमानी बद्धः ॥

५६ अत्र किंवदंतीं प्रमाणयति—

५७] या मतिः सा गतिर्भवेत् सा इह सत्या इयं किंवदन्ती ॥

५८) " या मतिः सा गतिर्भवेत् " इयं ह प्रसिद्धा । किंवदंती विद्वज्जनश्रुतिः । सत्या अवाधितार्था । " तं विद्याकर्मणी समारभेते पूर्व-प्रज्ञा च " इति श्रुतिपरिगृहीतत्वात् । " यं यं वापि स्मरन् भावं" इत्यादि स्मृतिपरिगृहीतत्वाच्च । तथा चाभिमानिकावेव वंधमोक्षौ न तु वास्तवावित्यर्थः । पूर्वमुक्तोऽप्ययमर्थो दुर्वोधत्वात् पुनः पुनः शिष्यवोधार्थमुच्यत इत्यर्थः ॥ १० ॥

---

५९ ननु जीवात्मनः पारमार्थिकावेव वंधमोक्षौ इति तार्किकाशंकामपाकर्तुमाह—

६०आत्मा ६१साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः
असंगो निःस्पृहः शांतो भ्रमात्संसारवानिव ११

६०] आत्मा ॥

६१) आत्मा भ्रमात् देहादावात्मतादात्म्य-भ्रमात् संसारवानिव प्रतीयते । न तु वस्तुतः संसारी ॥

६२ अत्र दशहेतूनाह—

६३] भ्रमात् संसारवान् इव साक्षी विभुः पूर्णः एकः मुक्तः चित् अक्रियः असंगः निःस्पृहः शांतः ॥

६४) कर्तुरहंकारादेः साक्षी न तु कर्ता । विभुः विविधं भवत्यस्मादिति विभुः सर्वाधिष्ठानं। पूर्णः व्यापकः । एकः सजातीयविजातीयस्वगत-भेदरहितः । मुक्तः वस्तुगत्या मायातत्कार्यातीतः। चित् स्वप्रकाशचैतन्यरूपः । अक्रियः चेष्टा-रहितः । असंगः सर्वसंबंधशून्यः । "असंगो ह्ययं पुरुष" इति श्रुतेः । निःस्पृहः विषयाभिलाष-रहितः । शांतः प्रवृत्तिनिवृत्तिदेहाद्यंतःकरणधर्म-रहितः । तस्माद्वस्तुतो न संसारीत्यर्थः ॥ ११ ॥

६५ अहं परिच्छिन्नो । ममेदं देहादिकं । सुखी दुःखी चाहमिति भ्रमस्यानादिपरंपरागतस्य सकृद्भावनया निवर्त्तयितुमशक्यत्वात् "आवृत्तिरसकृदुपदेशात्" इति व्याससूत्राच्च । पुनः पुनरद्वैतात्मभावनां विजातीयभावनानिवृत्तिपुरःसरामुपदिशति—

**६६ कूटस्थं बोधमद्वैतमात्मानं परिभावय ।**
**आभासोऽहं भ्रमं मुक्त्वा भावं बाह्यमथांतरम् ॥**

६६] अहं आभासः भ्रमं बाह्यम् अथ आंतरम् भावं मुक्त्वा कूटस्थं बोधं अद्वैतं आत्मानं परिभावय ॥

६७) हे शिष्य । आभासोऽहं अहंकारोऽहमिति भ्रमं मुक्त्वा । बाह्यं भावं ममेदं देहादिकमिति बाह्यपदार्थविषयं भावं संभावनां मुक्त्वा । अथ च आंतरं भावं सुखी दुःखी मूढोऽहमिति आंतरपदार्थविषयं भावं भावनां मुक्त्वा । अकर्त्तारं कूटस्थं असंगबोधस्वरूपं अद्वैतमात्मानं परिसमंताद्व्यापकं भावय इत्यर्थः ॥ १२ ॥

६८ अनादिरयं देहाभिमानः सकृज्ज्ञानेनया न निवर्तत इति पुनः पुनर्ज्ञानखड्गेन तं निःकृत्य सुखी भवेत्याह—

देहाभिमानपाशेन चिरं बद्धोऽसि पुत्रक ।
बोधोऽहं ज्ञानखड्गेन तन्निःकृत्य सुखी भव १३

६९] पुत्रक । देहाभिमानपाशेन चिरं बद्धः असि । अहं बोधः ज्ञानखड्गेन तत् निःकृत्य सुखी भव ॥

७०) हे पुत्रक हे शिष्य । त्वं देहोऽहमिति अभिमानपाशेन चिरं बहुकालं बद्धोऽसि । अतो बोधोऽहं चिद्रूपोऽहमिति ज्ञानखड्गेन । पुनः पुनः तं पाशं । निःकृत्य नितरां छित्त्वा । सुखी भव ॥ १३ ॥

७१ चित्तवृत्तिनिरोधरूपः समाधिरेव केवलो वंधनिवृत्तिहेतुरिति पातंजलमतमपाकर्तुमाह—

७२
**निःसंगो निष्क्रियोऽसि त्वं स्वप्रकाशो निरंजनः**
**अयमेव हि ते वंधः समाधिमनुतिष्ठसि ॥ १४ ॥**

७२] त्वं निःसंगः निष्क्रियः असि ॥

७३) हे शिष्य । त्वं वस्तुतो निःसंगः सर्वसंवंधशून्योऽसि । तथा क्रियारहितोऽसि ॥

७४ अत्र हेतुमाह—

७५] स्वप्रकाशः निरंजनः समाधिं अनुतिष्ठसि अयं एव ते वंधः हि ॥

७६) निष्क्रियस्य समाध्यनुष्ठानं यत् अयमेव हि निश्चितं वंधः । तथा च ज्ञानातिरिक्तोपायानुष्ठानमात्रं प्रत्युतवंध एवेत्यर्थः ॥ १४ ॥

७७ तदेवमात्मज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः। अथ परिपूर्णे शुद्धबुद्धात्मनि विपरीत-

धियमुत्सारयन्नेव चित्निष्ठामुपसंहरति श्लोकद्वयेन—

**त्वया व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थतः ।**
**शुद्धबुद्धस्वरूपस्त्वं मा गमः क्षुद्रचित्तताम्॥१५**

७८] इदं विश्वं त्वया व्याप्तं त्वयि प्रोतं त्वं यथार्थतः शुद्धबुद्धस्वरूपः । क्षुद्रचित्तताम् मा गमः ॥

७९) हे शिष्य । इदं विश्वं त्वया व्याप्तं कनकेनेव कटककुंडलादिकं यथा तथा ॥ इदं विश्वं त्वयि प्रोतं मृदिव घटशरावादिकं ॥ हे शिष्य । त्वं यथार्थतः परमार्थतः । शुद्धः अविद्यातत्कार्यप्रपंचातीतः । बुद्धः स्वप्रकाशः चिद्रूपोऽसि । एवं च । "सर्वगंधः सर्वरसः । नेति नेति" इति श्रुतिद्वयानुसारेणोक्ताभ्यामध्यारोपापवादाभ्यां निःप्रपंचमात्मतत्त्वमुपदिष्टं भवति ॥ हे शिष्य । परिपूर्णः शुद्धबुद्धस्वरूपस्त्वं क्षुद्रचित्ततां विपरीतचित्तवृत्तिं । मा गमः मा कार्षीरित्यर्थः ॥ १५ ॥

८० प्रतीयमानाः षडूर्मयः षड्भावविकाराश्च न त्वद्गतास्त्वं तद्विलक्षण इत्याह—

**८१ निरपेक्षो निर्विकारो ८४ निर्भरः शीतलाशयः ।**
**अगाधबुद्धिरक्षुब्धो भव चिन्मात्रवासनः ॥ १६**

८१] निरपेक्षः निर्विकारः ॥

८२) हे शिष्य! त्वं **निरपेक्षः** अशनापिपासादिषडूर्मिसंसर्गातीतः । तथा **निर्विकारः** " जायते अस्ति वर्धते विपरिणमते अपक्षीयते विनश्यति " इत्येवंविधाः यास्कादिप्रोक्ताः षड्भावविकारास्तत्संसर्गरहितस्त्वमित्यर्थः ॥

८३ तर्हि कीदृशोऽहमित्यत आह—

८४] निर्भरः शीतलाशयः अगाधबुद्धिः अक्षुब्धः चिन्मात्रवासनः भव ॥

८५) **निर्भरः** चिद्घनरूपः । **शीतलः** सुखस्वरूपः आमुक्तिसमयमभिव्याप्य शेते तिष्ठतीति **आशयः** । **अगाधः** अगाधा अतलस्पर्शा

अपरिच्छिन्ना बुद्धिः स्वरूपचैतन्यं तद्रूपः।अक्षुब्धः अविद्याकृतक्षोभरहितस्त्वं वस्तुतोऽसि । अतस्त्वं क्रियामात्ररहितश्चिन्मात्रनिष्ठो भव इत्यर्थः॥ १६॥

८६ " विषयान् विषवत्त्यज । सत्यं पीयूषवद्भज " इति मोक्षोपायः प्रथमश्लोके समुपदिष्टः । परंतु विषयाणां विषतुल्यत्वे सत्यात्मनः पीयूषतुल्यत्व च हेतुर्नोक्तस्तत्र हेतुं वदन्नेव षोडशश्लोकोपदेशो मोक्षहेतुश्चिदात्मा च स्वाध्यस्तं विश्वं समंततो व्याप्यावस्थितो मुकुर इव स्वाध्यस्तं शरीरादि इति तद्भावापत्तिरेव परमपुरुषार्थ इत्युपपत्तिमुखेन प्रकरणार्थं संगृह्णाति श्लोकत्रयेण ॥ "अथ संग्रहश्लोकाः" साकार इत्यादिना—

**साकारमनृतं विद्धि निराकारं तु निश्चलम् ।**
**एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः ॥ १७ ॥**

८७] साकारं अनृतं विद्धि । निराकारं तु निश्चलं एतत् तत्त्वोपदेशेन न पुनर्भवसंभवः ॥

८८) अथ । हे शिष्य । साकारं शरीरादिकं । अनृतं मिथ्याभूतं विद्धि । अतस्तत् विपवत्त्यजेत्यर्थः ॥ निराकारं आत्मतत्त्वं । निश्चलं कालत्रयावस्थायि विद्धि । सर्वसाक्षित्वात् " नित्यं विज्ञानमानंदं ब्रह्म" इति श्रुतेश्च । अत एतत्तत्वस्य चिन्मात्रस्य उपदेशेन उपदिश्यमानेन तत्रैव विश्राम्यावस्थानेन । न पुनर्भवस्य मोक्षस्य संभवः सिद्धिरित्यर्थः ॥ १७ ॥

ooooooooooooooooooooooooooooooo

८९ अथ वर्णाश्रमधर्मकस्थूलशरीरात्पुण्यापुण्यधर्मकलिंगशरीराद्विलक्षणं परिपूर्णं चैतन्यं सदृष्टांतं निरूपयति—

९०
**यथैवादर्शमध्यस्थे रूपेऽतः परितस्तु सः ।**
**तथैवास्मिन् शरीरेंतः परितः परमेश्वरः॥१८॥**

९०] यथा एव आदर्शमध्यस्थे रूपे अंतः परितः सः तु । तथा एव अस्मिन् शरीरे अंतः परितः परमेश्वरः ॥

९१) यथैवादर्शे प्रतिबिंबिते शरीरादौ अंतः मध्ये । परितः बहिश्च । स आदर्शो व्याप्य वर्तते । तथैव स्वाध्यस्ते अस्मिन् स्थूले शरीरे अंतःपरितः च । परमेश्वरः चिदात्मा व्याप्य स्थितः । तथा च " यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत्" इत्यादि सर्वोऽपि प्रकरणार्थः संक्षेपतः सूचितः ॥ १८ ॥

ooooooooooooooooooooooooooooooo

९२ आदर्शदृष्टांते परिच्छिन्नत्वादिभ्रमापत्तिः । स्वाध्यस्ते शरीरांतर्वर्तित्वं च न स्पष्टमतो घटाकाश-दृष्टांतेन बाह्याभ्यंतरव्यापकत्वमाह—

[९३] एकं सर्वगतं व्योम बहिरंतर्यथा घटे ।
नित्यं निरंतरं ब्रह्म सर्वभूतगणे तथा ॥१९॥

९३] यथा सर्वगतं एकं व्योम घटे बहिः अंतः तथा नित्यं ब्रह्म सर्वभूतगणे निरंतरं ॥

९४) यथा सर्वगतं एकं नित्यं व्योम घट-पटादौ वहिरंतः च वर्त्तते । तथा नित्यं अविनाशि ब्रह्म सर्वभूतगणे वहिरंतरं सर्वदा वर्त्तते इत्यर्थः । “ एप त आत्मा सर्वस्यांतर ” इति श्रुतेः । अतश्च बोधोऽहमिति ज्ञानखड्गेन देहादहंभावपाशं निःकृत्य सुखी भवेत्यर्थः॥ १९ ॥

॥ इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीताया-मात्मानुभवोपदेशनामकं प्रथमं प्रकरणं समाप्तम् ॥ १ ॥

# ॥ अथ शिष्योक्तमात्मानुभवोल्लास-नामकं द्वितीयं प्रकरणं ॥ २ ॥

इत्थं गुरूक्तिपीयूपस्वादानुभवमात्मनः ।
आविश्चकार साश्चर्यं शिष्यो निजगुरुं प्रति॥ १ ॥

९५ तत्र तावच्छिष्यश्चिद्रूपात्मानुभवमाविष्कुर्व-न्नेव गुरुकृतोपकारख्यापनाय प्राचीनसंस्कारवशा-

द्बाधितानुवृत्त्या प्रतीतस्य मोहविडंबनस्य स्मरण-
माविष्करोति—

**अहो[96] निरंजनः शांतो बोधोऽहं प्रकृतेः परः ।**
**एतावंतमहं[99] कालं मोहेनैव विडंबितः ॥ १ ॥**

९६] अहो निरंजनः अहं शांतः बोधः प्रकृतेः परः॥

९७) अदृष्टस्याद्भुतस्यानुभवात् अहो इत्या-
श्चर्ये । अहं निरंजनः सर्वोपाधिविनिर्मुक्तः ।
शांतः सर्वविकारातीतः। प्रकृतेः परः मायांधकार-
स्पर्शशून्यो । बोधः स्वप्रकाशचिद्रूप इत्यर्थः ॥

९८ गुरूपकारख्यापनाय मोहविडंबनमनु-
स्मरति—

९९] एतावंतं कालं अहं मोहेन एव विडंबितः ॥

१००) एतावंतं गुरूपदेशावधिकालं ।
मोहेन देहात्माविवेकेन । विडंबितः एव ।
सांप्रतं तु श्रीगुरुप्रसादादात्मानंदानुभवोऽस्मीति
विवक्षितोऽर्थः ॥ १ ॥

१०१ पूर्वकालीनं मोहविडंबनमुक्तं। संप्रतिगुरु-प्रसादान्मम देहात्मविवेकोऽस्तीति सोपपत्तिकमाह—

[१] यथा [२] प्रकाशयाम्येको देहमेनं तथा जगत् ।
[१] अतो मम जगत्सर्वमथवा न च किंचन ॥२॥

१०२] एकः यथा जगत् प्रकाशयामि तथा एनं देहम्

१०३) अहं यथा एक एव जगत् प्रकाशयामि। तथा एव एनं स्थूलं देहं प्रकाशयामि । तथा च । देहोऽनात्माऽप्रकाशत्वाद्यथा जगत्तद्वदित्यर्थः ॥

१०४ कस्तर्हि जगदादिदेहात्मनोः संबंध इत्याशंक्य । युक्तिविचारादाध्यासिकः संबंधः । परमार्थगत्या च न कश्चित्संबंध इत्याह—

१०५] अतः सर्वं जगत् मम अथवा किंचन न च॥

१०७) अतो दृश्यत्वात् सर्वं देहप्रमुखं जगत् मम मदीयं मय्यध्यस्तमित्यर्थः । चावधारणे ॥ अथवा परमार्थविचारे । किंचन किमपि

देहादिकं । मम न च नैव मय्यध्यस्तमित्यर्थः । तदेवमध्यारोपापवादाभ्यां प्रकृतेः परो बोधोऽहमित्येवात्र स्फुटीकृतम् ॥ २ ॥

०००००००००००००००००००००००००००००००

१०८ ननु लिंगदेहात् कारणदेहाच्च विवेकाभावे कथं प्रकृत्यतिरिक्तात्मबोध इत्याशंक्य । ततोऽपि विवेकजमात्मानुभवमाह—

**सशरीरमहो विश्वं परित्यज्य मयाऽधुना ।**
**कुतश्चित्कौशलादेव परमात्मा विलोक्यते ॥३॥**

१०८] अहो अधुना सशरीरं विश्वं परित्यज्य कुतः चित् कौशलात् एव परमात्मा मया विलोक्यते ॥

११०) अहो इत्याश्चर्ये । अधुना । सशरीरं लिंगशरीरकारणशरीरसहितं । विश्वं । परित्यज्य विचारतः पृथक्सत्तया निषिध्य । कुतश्चित् शास्त्राचार्योपदेशप्रलब्धात् । कौशलात् चातुर्यात् एव परमश्रेष्ठ आत्मा मया विलोक्यते । नान्यः परमात्मावलोकनोपाय इत्यर्थः ३

११० सशरीरविश्वस्य पृथक्सत्तया परित्यज्य । तं सदृष्टांतं निरूपयति—

यथा न तोयतो भिन्नास्तरंगाः फेनवुद्बुदाः ।
आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतम् ४

१११] यथा तरंगाः फेनवुद्बुदाः तोयतः भिन्नाः न तथा आत्मनः विश्वं आत्मविनिर्गतं भिन्नं न ॥

११२) यथा तरंगाः फेनवुद्बुदाः च । न तोयतो भिन्नाः तदुपादानत्वात् । तथा आत्मविनिर्गतं आत्मनः संजातं आत्मोपादानकं। विश्वं आत्मनो न भिन्नं । एवं च । तोयतरंगादिपु जलं यथा स्वच्छमनुगतं । तथा स्वच्छचिद्रूपोऽहं विश्वस्मिन्नधिष्ठानभूतो । न मत्तोऽन्यद्विश्वमित्यर्थः ॥ ४ ॥

११३ दृष्टांतांतरेणात्मरूपतया सर्वावलोकनं निरूपयति—

**तंतुमात्रो भवेदेव पटो यद्वद्विचारितः ।**
**आत्मतन्मात्रमेवेदं तद्वद्विश्वं विचारितम् ॥ ५ ॥**

११४] यद्वत् पटः विचारितः तंतुमात्रः एव भवेत् तद्वत् इदं विश्वं विचारितं आत्मतन्मात्रं एव ॥

११५) स्थूलदृष्ट्या तंतुवैलक्षण्येन प्रतीयमानोऽपि पटो विचारितः विचारविषयीकृतः सन् । यद्वत् यथा । तंतुमात्रो । भवेत् अस्ति । तद्वत् तथा । इदं विश्वं । स्थूलदृष्ट्या ब्रह्मवैलक्षण्येनापि प्रतीयमानं । युक्त्या विचारितं सत् । आत्मतन्मात्रमेव आत्मसत्तामात्रात्मकमेव । एतेन तंतुः स्वसत्तया यथा पटेऽनुगतस्तथात्मापि स्वसत्तयाधिष्ठानभूतो विश्वस्मिन्ननुगत इत्यर्थः ॥ ५ ॥

११६ आत्मनैव सर्वं व्याप्तमित्यत्र दृष्टांतांतरमाह—

[११७] यथैवेक्षुरसे क्लृप्ता तेन व्याप्तैव शर्करा ।
तथा विश्वं मयि क्लृप्तं मया व्याप्तं निरंतरम् ॥६॥

११७] यथा एव इक्षुरसे क्लृप्ता शर्करा तेन व्याप्ता एव तथा मयि क्लृप्तं विश्वं मया निरंतरं व्याप्तं ॥

११८) यथैवेक्षुरसे क्लृप्ता अध्यस्ता शर्करा । तेन मधुररसेन । व्याप्तैव सर्वापि व्याप्ता ॥ तथा एव । मयि नित्यानंदस्वरूपे । क्लृप्तं अध्यस्तं । इदं विश्वं । मया नित्यानंदेन । निरंतरं बाह्याभ्यंतरं । व्याप्तं ॥ तस्मात् विश्वमानंदात्मस्वरूपमेवेत्यर्थः ॥ तदेवमस्तिभातिप्रियमित्येवंरूपेणाहमेव सर्वत्रावस्थित इति श्लोकत्रयविवक्षितोऽर्थः॥६॥

११९ विश्वं चिदात्मनो न भिन्नं । तर्हि केन कारणेनेदं भासते । केन च कारणेन न भासत इत्याशंक्याह—

**आत्माज्ञानाज्जगद्भाति आत्मज्ञानान्न भासते।**
**रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद्भासते न हि ७**

१२०] आत्माज्ञानात् जगत् भाति । आत्मज्ञानात् न भासते ॥

१२१) आत्मनः अज्ञानाज्जगद्भाति । तथा आत्मन अधिष्ठानस्य ज्ञानान्न भासते ॥

१२२ अधिष्ठानाज्ञानादन्यस्य भानेऽधिष्ठानज्ञानाच्च न भाने लोकप्रसिद्धदृष्टांतमाह—

१२३] रज्ज्वज्ञानात् अहिः भाति । तज्ज्ञानात् हि भासते न ॥

१२४) हि यथा । रज्जु स्वरूपस्य अज्ञानादहिः सर्पो भाति । तज्ज्ञानाद्रज्जुज्ञानान्न भासते ॥ ७ ॥

१२५ नन्वात्माज्ञाने सति आत्मप्रकाशाभावा-ज्जगत्कथं भासत इत्याशंक्य । स्वरूपचैतन्यबला-देवेत्याह—

**[१२६] प्रकाशो मे निजं रूपं नातिरिक्तोऽस्म्यहं ततः**
**यदा प्रकाशते विश्वं तदाहंभास एव हि ॥८॥**

१२६] प्रकाशः मे निजं रूपं अहं न अतिरिक्तः अस्मि । कुतः । यदा विश्वं प्रकाशते । तदा अहं भासः एव हि ॥

१२७) प्रकाशो नित्यबोधः । मे मम । निजं स्वाभाविकं । स्वरूपं । अहं । ततः प्रकाशात् । अतिरिक्तः भिन्नो नास्मि ॥ अतो मम । यदा विश्वं प्रकाशते । तदा अहंभासा-दात्मप्रकाशात् एव भासते ॥ स्वरूपचैतन्यं चिद्भासकं । किं तु साधकमेव । अन्यथा । जडस्य सिद्धिरेव न स्यात् । किं च । आत्मस्वरूपप्रकाशा-भावे स्वात्मनोऽप्यसत्वप्रसक्तिर्जगदांध्यप्रसंगश्च ।

तस्मात् यदा विश्वं प्रकाशते तदात्मस्वरूप-प्रकाशादेवेति भावः ॥ ८ ॥

oooooooooooooooooooooooooooooooooo

१२८ स्वप्रकाशेऽपि मय्यात्मन्यज्ञानवशाद्विश्वं भासत इति महदाश्चर्यं सदृष्टांतमाह—

१२९
अहो विकल्पितं विश्वमज्ञानान्मयि भासते ।
रूप्यं शुक्तौ फणी रज्जौ वारि सूर्यकरे यथा ९

१२९] अहो ! मयि अज्ञानात् विकल्पितं विश्वं भासते । यथा शुक्तौ रूप्यं रज्जौ फणी सूर्यकरे वारि ॥

१३०) स्वप्रकाशेऽपि मयि । अज्ञानाद्वि-कल्पितं रचितं अध्यस्तं विश्वं मयि भासते । अहो आश्चर्यमिदं ॥ यथा शुक्त्यादौ रूप्यादिकं भासते । तद्वदित्यर्थः ॥ ९ ॥

१३१ ननु मायाविकारत्वात्तत्रैव विश्वमुत्पद्यते। तत्रैव लयमेति । न तु चैतन्यात्मनीति सांख्यमत-मपाकर्तुमाह—

१३२
**मत्तो विनिर्गतं विश्वं मय्येव लयमेष्यति ।**
**मृदि कुंभो जले वीचिः कनके कटकं यथा१०**

१३२] विश्वं मत्तः विनिर्गतं मयि एव लयं एष्यति यथा मृदि कुंभः जले वीचिः कनके कटकं ॥

१३३) इदं विश्वं मत्त एव विनिर्गतं। मय्येव लयमेष्यति प्राप्स्यति। यथा मृदादौ कुंभादिकं। तद्वदित्यर्थः ॥ न चात्र प्रमाणाभाव इति शंकनीयं " यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशन्ति" इति श्रुतेः ॥ १० ॥

१३४ ननु ब्रह्मचेज्जगदुपादानकारणं तर्हि तस्य विकारित्वान्मृदादिवद्विनाशित्वापत्तिरित्याशंक्याह—

१३५

**अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे ।**
**ब्रह्मादिस्तंबपर्यंतं जगन्नाशेऽपि तिष्ठतः॥११॥**

१३५] अहं अहो! ब्रह्मादिस्तंबपर्यंतं जगत् नाशे अपि तिष्ठतः यस्य मे विनाशः न अस्ति मह्यं नमः ॥

१३६) अहो आश्चर्यरूपोऽहं । यस्य मम सर्वोपादानभूतस्यापि विनाशो नास्ति । न चोपादानत्वे सुवर्णादिवद्विनाशित्वापत्तिः । सुवर्णादिवद्विकारित्वानंगीकाराद्विवर्त्ताधिष्ठानत्वेनैवोपादानत्वस्वीकारात् । अत एवाशेषकार्योपादानत्वादविनाशिने सर्वोत्कृष्टाय मह्यं नमः । ब्रह्मादिदेवतावत् प्रलये विनाशशंकां निराकरोति ॥ ब्रह्मादिस्तंबपर्यंतं यत् जगत् । तस्य नाशेऽपि तिष्ठतः-प्रलयेऽपि स्थितिमतो यस्य मे विनाशो नास्तीत्यर्थः ॥ "सत्यं ज्ञानमनंतं ब्रह्म" इति श्रुतेः॥११॥

१३७ नन्वात्मा सुखदुःखावच्छेदकदेहवान्नाना । तथाहंकाररूपत्वात्तत्तद्देशगमनागमनवानित्याशंक्याह–

१३८ अहो अहं नमो मह्यमेकोऽहं देहवानपि ।
१४३ क्वचिन्न गंता नागंता व्याप्य विश्वमवस्थितः १२

१३८] अहो अहं मह्यं नमः ॥

१३९) अहो आश्चर्यरूपः अहं । आश्चर्यरूपाय मह्यं नमः इत्यर्थः ॥

१४० आश्चर्यरूपत्वमेवाह–

१४१] देहवान् अपि एकः अहम् ॥

१४२) नानासुखदुःखावच्छेदकदेहवानप्यहमेक एव । यथा नानासकंपनिःकंपत्वावच्छेदकजलोपाधिमानपि भानुरेक एवेत्यर्थः ॥

१४३] क्वचित् न गंता न आगंता विश्वं व्याप्य अवस्थितः ॥

१४४) विश्वं व्याप्यावस्थितः परिच्छि-न्नाहंकारविलक्षणोऽहं । क्वचित् अपि न गंता । कुतोऽपि नागंता एवेत्यर्थः ॥ १२ ॥

०००००००००००००००००००००००००००००००

१४५ नन्वात्मनः निःसंगत्वं कथं । शरीर-संसर्गितया जगद्विधारकत्वादित्याशंक्याह–

१४६
अहो अहं नमो मह्यं दक्षो नास्तीह मत्समः ।
असंस्पृश्य शरीरेण येन विश्वं चिरं धृतम् १३

१४६] अहो अहं मह्यं नमः । इह मत्समः दक्षः न अस्ति येन शरीरेण असंस्पृश्य चिरं विश्वं धृतम् ॥

१४७) प्रथमपादार्थः पूर्ववदिति कारणात् मत्समो दक्षो असंभाव्यकार्यविधानचतुरः । कोऽपि नास्ति येन हेतुना । शरीरेणासंस्पृश्य घृतपिंडेनोल्मुकवदसंबध्यैव । चिरं बहुकालं । विश्वं स्थावरजंगमं । मया । धृतम् ॥ १३ ॥

१४८ नन्वसंबद्धस्य न जगद्विधारकत्वं । संबद्धस्यैव भित्त्यादेर्गृहादिधारकत्वादित्याशंक्याह–

[१४९]अहो अहं नमो मह्यं यस्य मे नास्ति किंचन ।
अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरम् ॥१४॥

१४९] अहं अहो मह्यं नमः यस्य मे किंचन न अस्ति अथवा यस्य मे यत् वाङ्मनसगोचरं सर्वम् ॥

१५०) अहो आश्चर्यरूपः। अहं। तस्मै मे नमः॥ यस्य मे संबंधि । परमार्थगत्या किंचन किमपि । नास्ति ॥ परमार्थसतो द्वितीयस्यैवाभावात् ॥ अथवा यत् यावत् वाङ्मनसगोचरं तावत् सर्वं। यस्य मे मम संबंधि मिथ्यातादात्म्यसंबन्धः । सुवर्णकुंडलादिवदित्यर्थः ॥ अत एव सर्वसंबंधित्वा-संबंधित्वाभ्यामाश्चर्यरूपाय मह्यं नम इत्यर्थः ॥१४॥

१५१ ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वात्कथं मिथ्यातादात्म्यसंबंधो जगदात्मनोरित्याशंक्याह—

ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवम्।
अज्ञानाद्भाति यत्रेदं सोऽहमस्मि निरंजनः१५

१५२] ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं वास्तवं न अस्ति यत्र इदं अज्ञानात् भाति सः निरंजनः अहं अस्मि ॥

(१५३) ज्ञानं ज्ञेयं तथा ज्ञाता इत्यादिकं त्रितयं त्रिपुटीरूपं सर्वं । वास्तवं परमार्थिकं । नास्ति ॥ यत्र मयि । इदं त्रितयं । अज्ञानात् अनिर्वचनीयाज्ञानान्मिथ्यातादात्म्येनाध्यस्तं भाति। अत एव वस्तुगत्याऽहं निरंजनः प्रपंचमलसंबंधशून्योऽस्मि इत्यर्थः ॥ १५ ॥

१५४ ननु निरंजनस्य कथं दुःखसंबंध इत्याशंक्य। द्वैतभ्रांतिमूलक एवासौ।न तु वास्तव इत्याह—

**द्वैतमूलमहो दुःखं नान्यत्तस्यास्ति भेषजम् ।**
**दृश्यमेतन्मृषा सर्वं एकोहं चिद्रसोऽमलः॥१६॥**

१५५] अहो द्वैतमूलं दुःखम् ॥

१५६) अहो आश्चर्यं । निरंजनस्याप्यात्मनः द्वैतमूलं दुःखं द्वैतभ्रमाद् दुःखाध्यासो । न तु वास्तवं दुःखमित्यर्थः ॥

१५७ दुःखाध्यासमहाव्याधेः किं भेषजमित्याशंक्याह—

१५८] अमलः चिद्रसः एकः अहं एतत् दृश्यं सर्वं मृषा न अन्यत् तस्य भेषजं अस्ति ॥

१५९) अमलो मायातत्कार्यातीतः चिद्रसः चिन्मात्रस्वरूप एकोऽहं । एतत् प्रतीयमानं । सर्वं दृश्यं जडजातं । मृषा मिथ्या । परमार्थिकमिति बोधात् अन्यत्तस्य त्रिविधदुःखव्याधेः भेषजं नास्ति इत्यर्थः ॥ १६ ॥

१६० नन्वयं द्वैतप्रपंचाध्यासः । किं निमित्तः किमुपादानक इत्याशंक्याह—

**बोधमात्रोऽहमज्ञानादुपाधिः कल्पितो मया ।**
**एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम १७**

१६१] बोधमात्रः अहं मया अज्ञानात् उपाधिः कल्पितः ॥

१६२) बोधमात्रः चिदेकस्वरूपः । अहं एव पारमार्थिकः । मया सर्वोपादानभूतेन कर्त्रा अज्ञानात् अखंडाज्ञानरूपनिमित्तादहंकारप्रमुख उपाधिः द्वैतप्रपंचः । कल्पितः ॥

१६३ एवं विचारस्य फलमाह—

१६४] एवं नित्यं निर्विकल्पे मम विमृशतः स्थितिः॥

१६५) एवं नित्यं विमृशतो विचारयतो मम । निर्विकल्पे निरस्तद्वैते स्वरूपचैतन्ये । स्थितिः प्रजाता ॥ १७ ॥

१६६ ननु स्वरूपचैतन्यप्राप्तिरूपा मुक्तिः प्रागुक्तविचारजन्या चेत्तदामुक्तेर्विनाशापत्तिः जन्यभावस्य विनाशित्वनियमात् । विचाराजन्या चेत्तदा विचाररहितानामपि मोक्षापत्तिरित्याशंक्याह—

१६७ न मे वंधोऽस्ति मोक्षो वा १७० भ्रांतिः शांता निराश्रया
अहो मयि स्थितं विश्वं वस्तुतो न मयि स्थितम् १८

१६७] मे वंधः वा मोक्षः न अस्ति ॥

१६८) वस्तुतो मे मम वंधो नास्ति । वा न च मोक्षोऽप्यस्ति । नित्यचिद्रूपत्वात् ॥

१६९ तर्हि शास्त्रविचारस्य किं फलमित्याशंक्य । भ्रांतिनिवृत्तिरेव तत्फलमित्याह—

१७०] अहो मयि स्थितं विश्वं वस्तुतः मयि स्थितं न निराश्रया भ्रांतिः शांता ॥

१७१) अहो आश्चर्यं । मयि स्थितं अपि विश्वं । वस्तुतः । कालत्रयेऽपि । मयि न स्थितं इति विचारतोऽपि भ्रांतिः एव शांता ।

न तु परमानंदावासिर्जनिता । आत्मनः सर्वदा परमानंदरूपत्वात् ॥ कीदृशी भ्रांतिः । निराश्रया उक्तविचाराज्ञानस्य नष्टत्वान्निर्मूलेत्यर्थः ॥ १८ ॥

oooooooooooooooooooooooooooooooo

१७२ नन्वधिष्ठानस्योपादानस्य सत्वान्मुक्तेष्वपि प्रपंचोदयः स्यादित्याशंक्याह--

[१७३] सशरीरमिदं विश्वं न किंचिदिति निश्चितम् ।
शुद्धचिन्मात्र आत्मा च तत्कस्मिन्कल्पनाधुना

१७३] सशरीरं इदं विश्वं किंचित् न इति निश्चितम् । आत्मा शुद्धचिन्मात्रः च तत् अधुना कस्मिन् कल्पना ॥

१७४) सशरीरं शरीरसहितं । इदं विश्वं । न किंचित् सत्यं नाप्यसत्यम् इति निश्चितं । " नेह नानास्ति किंचन " इति श्रुतेः ॥ आत्मा च चिन्मात्रः शुद्धः मायामलशून्यः । तत् तस्मात्कारणात् । अधुना अज्ञाननिवृत्तौ सत्यां । कस्मिन् अधिष्ठाने । विश्वकल्पना स्यान्न कस्मिन्नपीत्यर्थः ॥ १९ ॥

१७५ ननु सर्वस्य प्रपंचस्यावास्तवत्वे । वर्ण-जात्याश्रयं शरीरमप्यवास्तवमेवेति शरीरविशेष-मधिकृत्य प्रवर्त्तमानं विधिनिषेधशास्त्रमप्यवास्तवं स्यात् । तथा च । तद्बोधितस्वर्गनरकयोरप्य-वास्तवत्वात्। स्वर्गादावनुरागो। नरकादिभ्यश्चभयं। न स्यात् ॥ किं च शास्त्रबोध्यौ बंधमोक्षावपि वास्तवौ न स्यातामित्याशंक्येष्टापत्त्या परिहरति—

१७६
**शरीरं स्वर्गनरकौ बंधमोक्षौ भयं तथा ।**
**कल्पनामात्रमेवैतत्किं मे कार्यं चिदात्मनः २०**

१७६] शरीरं स्वर्गनरकौ बंधमोक्षौ तथा भयं एतत् कल्पनामात्रं एव । चिदात्मनः मे किं कार्यं ॥

१७७) शरीरादिकमेवैतत् कल्पनामात्रमेव। चिदात्मनः सच्चिदानंदस्वरूपस्य मम एतैः शरी-रादिभिः किं कार्यं । न किमपि कार्यं साध्यं । विधिनिषेधादिकं त्वविद्यावंतमेवाधिकृत्य प्रमाण-मित्यर्थः ॥ २० ॥

१७८ स्वर्गादिभिः किं मे कार्यमिति प्रागुक्तं। अथेह लोकेनापि मे कार्यं नास्तीत्याह—

१७९
अहो जनसमूहेऽपि न द्वैतं पश्यतो मम।
अरण्यमिव संवृत्तं क रतिं करवाण्यहम्॥२१॥

१७९] पश्यतः मम द्वैतं न अहो जनसमूहे अपि अरण्यं इव संवृत्तं क रतिं करवाणि अहम् ॥

१८०) न द्वैतं पश्यतो मम। अहो इत्याश्चर्यं। जनसमूहेऽपि। अरण्यमिव। संवृत्तं संजातं। तस्मात्। अहं मिथ्यात्वे क रतिं। प्रीतिं करवाणि न कापीत्यर्थः ॥ २१ ॥

००००००००००००००००००००००००००००००००

१८१ ननु शरीरस्याहंममतास्पदतयानुरागविषयत्वादहंकारस्याप्यहंतास्पदतयानुरागविषयत्वात्तत्र स्पृहा स्यादित्याशंक्याह—

१८२ नाहं देहो न मे देहो जीवो नाहमहं हि चित्। १८५
अयमेव हि मे बंध आसीद्या जीविते स्पृहा॥२२

१८२] अहं देहः न। न मे देहः। अहं जीवः न ॥

१८३) अहं देहो न । जडत्वान्नापि मे देहः । मम निःसंगत्वात् । जीवः अहंकारो । नाहं । तस्य कर्तृत्वात् आत्मनश्चाकर्तृत्वात् ॥

१८४ कस्तर्हि त्वमित्याशंक्याह—

१८५] अहं हि चित् ॥

१८६) चित्स्वरूप एव अहं इत्यर्थः ॥

१८७ कुतस्तर्हि विवेकिनामपि जीविते स्पृहेत्याशंक्याह—

१८८] जीविते स्पृहा अयं एव मे बंधः या आसीत् हि ॥

१८९) या जीविते स्पृहा । अयमेव हि मे बंधः प्राक् आसीत् ॥ जीवनार्थं हि पुमान् सुवर्णहरणादिकमपि करोतीति जीवितेच्छा बंधः । बंधहेतुत्वात् ॥ इदानीं तु सच्चिदानंदानुभवशालिनो-ममासंगस्य प्राणानुषंगबंधनरूपे जीवितेऽपि स्पृहा नास्ति इत्यर्थः ॥ २२ ॥

१९० अथ स्वस्य सर्वाधिष्ठानत्वं पद्येनाह—

१९१

**अहो भुवनकल्लोलैर्विचित्रैर्द्राक् समुत्थितम् ।**
**मय्यनंतमहांभोधौ चित्तवाते समुद्यते ॥ २३ ॥**

१९१] अहो अनंतमहांभोधौ मयि चित्तवाते भुवन-कल्लोलैः विचित्रैः द्राक् समुत्थितं समुद्यते ॥

१९२) अहो आश्चर्यं । अनंतमहांभोधौ मयि । चित्तवाते समुद्यते समुत्पन्ने सति । विचित्रैः नानाविधैः । भुवनकल्लोलैः भुवन-रूपैस्तरंगैः । द्राक् अत्यर्थं । समुत्थितं उदयो लब्धः । यथा वारिधेस्तरंगास्तथा मत्तो भुवनानि । वस्तुतो न भिन्नानीत्यर्थः ॥ २३ ॥

ooooooooooooooooooooooooooooo

१९३ प्रारब्धक्षयदशामनुवदति—

**मय्यनंतमहांभोधौ चित्तवाते प्रशाम्यति ।**
**अभाग्याज्जीववणिजो जगत्पोतो विनश्वरः २४**

१९४] अनंतमहांभोधौ मयि चित्तवाते प्रशाम्यति जीववणिजः अभाग्यात् जगत्पोतः विनश्वरः ॥

१९५) अनंतमहांभोधौ सर्वव्यापकचित्-समुद्रे । मयि । चित्तवाते संकल्पविकल्पक-शालिनि मनोमारुते । प्रशाम्यति सति संकल्पादि-रहिते सति । जीववणिजो जीवात्मलक्षणस्य वाणिज्यकर्तुः । अभाग्यात् प्रारब्धक्षयात् । जगत्पोतः शरीरादिनौकासमूहः । विनाशवान् भवतीत्यर्थः ॥ २४ ॥

००००००००००००००००००००००००००००००००

१९६ अथ वाधितानुवृत्त्या स्वस्मिन् सर्व-जीवव्यवहारं पश्यन्नाह—

**[१९७] मय्यनंतमहांभोधावाश्चर्यं जीववीचयः ।**
**उद्यंति घ्नंति खेलंति प्रविशंति स्वभावतः २५**

१९७] आश्चर्यं । मयि अनंतमहांभोधौ जीववीचयः उद्यंति घ्नंति खेलंति स्वभावतः प्रविशंति ॥

१९८) आश्चर्यं । निःक्रिये निर्विकारे मयि अनंतमहांभोधौ । जीवा एव वीचयः तरंगाः । उद्यंति अभिव्यक्ता भवंतीव मिथः ( परस्परं ) । घ्नंति ताडयंतीव शत्रुभावाध्यासात् । अन्ये च ।

मिथः खेलंति इव मित्रभावाध्यासात् । अविद्याकामकर्मक्षये सति च मयि विशंतीव । कस्मात् स्वभावतः अविद्याकामकर्मस्वभाववशात् उत्पत्त्यादिकं प्राप्नुवंति । स्वभावतः स्वस्य चिद्रूपस्यांशरूपेण स्वभावतः तत्रैव प्रविशंति । घटाकाशाद्य इव महाकाश इति विवेकः ॥ २५ ॥

द्वितीयेऽस्मिन् प्रकरणे शिष्येणानुभवस्थितिः ॥
निवेदिता गुरोस्तुष्ट्यै वह्वाश्चर्यपुरःसरा ॥ १ ॥

इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायां शिष्येणोक्तमात्मानुभवोल्लासपंचविंशतिकं नाम द्वितीयं प्रकरणं समाप्तम् ॥ २ ॥

## ॥ शिष्यं प्रत्याक्षेपद्वारोपदेशकं नाम तृतीयं प्रकरणं ॥ ३ ॥

शिष्यानुभवपीयूषे ज्ञातेऽपि करुणावशात् ।
तद्विज्ञानपरीक्षार्थं शिष्यमाह गुरुः पुनः ॥ १ ॥

१९९ विज्ञानानुभवमपि स्वशिष्यं व्यवहार-स्थितं दृष्ट्वा तद्विज्ञानपरीक्षार्थं तद्व्यवहारे स्थिति-माक्षिप्यात्मानुभवशालिनीं स्थितिमुपदिशति—

२००
**अविनाशिनमात्मानमेकं विज्ञाय तत्त्वतः ।**
**तवात्मज्ञस्य धीरस्य कथमर्थार्जने रतिः ॥ १ ॥**

२००] अविनाशिनं एकं आत्मानं विज्ञाय तत्त्वतः आत्मज्ञस्य धीरस्य तव अर्थार्जने कथं रतिः ॥

२०१) हे शिष्य । अविनाशिनं निर्विकल्पं त्रैकालिकसत्ताशालिनं कालतो व्यवच्छेदशून्यं । आत्मानं देशतो व्यवच्छेदशून्यं । एकं वस्तुतो व्यवच्छेदशून्यं । चित्स्वरूपं । विज्ञाय निदि-ध्यास्य । तत्त्वतः आत्मज्ञस्य । अत एव धीरस्य । तव अर्थार्जने व्यावहारिकार्थसंग्रहे । कथं रतिः प्रीतिर्लक्ष्यते इत्याक्षेपः ॥ १ ॥

२०२ ननु ज्ञाने सति विषयसंग्रहः कथमनुपपन्न इत्याशंक्य । विषयप्रीतेरात्माज्ञानमूलत्वं सदृष्टांतं सोपपत्तिकमाह—

**आत्माज्ञानादहो प्रीतिर्विषयभ्रमगोचरे ।**
**शुक्तेरज्ञानतो लोभो यथा रजतविभ्रमे ॥ २॥**

२०३] अहो विषयभ्रमगोचरे प्रीतिः आत्माज्ञानात्॥

२०४) अहो इति संबोधने । हे शिष्य । **विषयभ्रमगोचरे** विषये या **प्रीतिः** । सा **आत्माज्ञानात्** एव भवति । न तु ज्ञानात्तद्व्यतिरिक्तविषयाणां बाधादिति भावः ॥

२०५ अत्र लोकप्रसिद्धं दृष्टांतमाह—

२०६] यथा रजतविभ्रमे शुक्तेः अज्ञानतः लोभः ॥

२०७) **यथा रजतविभ्रमे** सति **शुक्तेरज्ञानतो लोभः** पामराणामपि अनुभवसाक्षिक इत्यर्थः ॥ " विषयभ्रमगोचर " इत्यत्र विशेष्यस्यापि पूर्वं निपातः " विशेषणं विशेष्येण

बहुलं " इत्यत्र बहुलग्रहणादाम्रवृक्षवत् । "आत्मा-ज्ञानात्" इति पदं विषयभ्रमगोचर इत्यनेनापि संबध्यते ॥ २ ॥

००००००००००००००००००००००००००००००००

२०८ अज्ञानमूला विषयप्रीतिरिति प्रागुक्तं । अथ सर्वाध्यस्ताधिष्ठानतयात्मनि ज्ञाते सति । विषयेषु पुनः न प्रीतिः संभवते इत्याह—

२०९

**विश्वं स्फुरति यत्रेदं तरंगा इव सागरे ।**
**सोऽहमस्मीति विज्ञाय किं दीन इव धावसि॥३॥**

२०९] सागरे तरंगाः इव यत्र इदं विश्वं स्फुरति सः अहं अस्मि इति विज्ञाय दीनः इव किं धावसि ॥

२१०) सागरे तरंगा इव यथा पृथक् सत्तारहितास्तद्वत् यत्रेदं विश्वं पृथक्सत्तारहितं स्फुरति । सः तत्पदार्थो अहमस्मीति विज्ञाय साक्षात्कृत्य । दीन इव ममेदं भवत्विति तृष्णा-कुल इव । किं धावसि कथं धावसीति आक्षेपः॥३

२११ तदेवं श्लोकत्रयेण ज्ञानिनि शिष्ये दृश्यमानं विषयव्यवहारमाक्षिप्येदानीं सर्वज्ञानिषु विषयव्यवहारं शिष्यपरीक्षार्थं गुरुराक्षिपति—

[२१२] श्रुत्वापि शुद्धचैतन्यमात्मानमतिसुंदरम् ।
उपस्थेऽत्यंतसंसक्तो मालिन्यमधिगच्छति ॥४

२१२] शुद्धचैतन्यं अतिसुंदरं आत्मानं श्रुत्वा अपि उपस्थे अत्यंतसंसक्तः मालिन्यं अधिगच्छति ॥

२१३) शुद्धचैतन्यं श्रुत्वापि गुरुमुखाद्वेदांतवाक्यतः साक्षात्कृत्यापि । उपस्थे समीपस्थे विषये । अत्यंतसंसक्तः सन् आत्मज्ञः । कथं मालिन्यं मौढ्यं । अधिगच्छति प्राप्नोति ॥ अस्य प्रकरणस्य शिष्यजिज्ञासार्थमाक्षेपमुद्रयैव प्रवृत्तत्वाद्यत्राक्षेपवाचकं पदं न दृश्यते तत्र तदध्याहर्त्तव्यम् ॥ ४ ॥

२१४ पुनरप्याश्चर्यमुद्भयाक्षिपति—

२१५ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
मुनेर्जानत आश्चर्यं ममत्वमनुवर्त्तते ॥ ५ ॥

२१५] सर्वभूतेषु आत्मानं जानतः च सर्वभूतानि च आत्मनि मुनेः ममत्वं अनुवर्त्तते आश्चर्यम् ॥

२१६) सर्वभूतेषु ब्रह्मादिस्थावरांतेषु । आत्मानं अधिष्ठानभूतं जानतः । सर्वभूतानि चात्मनि रज्जौ भुजंगवदध्यस्तानि जानतो मुनेः । विषयेषु ममत्वमनुवर्त्तते इति आश्चर्यं असंभाव्यं । न हि शुक्तिकायामध्यस्तं रजतं इति जानतस्तत्र ममत्वं संभवतीति भावः ॥ ५ ॥

[२१७] आस्थितः परमाद्वैतं मोक्षार्थेऽपि व्यवस्थितः ।
आश्चर्यं कामवशगो विकलः केलिशिक्षया ॥६॥

२१७] परमाद्वैतं आस्थितः मोक्षार्थे अपि व्यवस्थितः कामवशगः केलिशिक्षया विकलः आश्चर्यम् ॥

२१८) आस्थितः परमं सजातीयविजातीयस्वगतभेदशून्यं अद्वैतं आस्थितः साक्षादनुभवन् । तथा मोक्षस्वरूपोऽर्थः सच्चिदानंदात्मा । तत्र व्यवस्थितः तदेकप्रवणोऽपि । कामवशगः सन् । केलिशिक्षया नानाक्रीडाभ्यासेन । विकलः दृश्यते इति आश्चर्यम् ॥ ६ ॥

[२१९] उद्भूतं ज्ञानदुर्मित्रमवधार्यातिदुर्बलः ।
आश्चर्यं काममाकांक्षेत्कालमंतमनुश्रितः ॥७॥

२१९] उद्भूतं कामं ज्ञानदुर्मित्रं अवधार्य अतिदुर्बलः आकांक्षेत् । आश्चर्यं अंतं कालं अनुश्रितः ॥

२२०) उद्भूतं कामं ज्ञानदुर्मित्रं ज्ञानस्यात्यंतवैरिणं अवधार्य निश्चित्यापि अतिदुर्बलः

अतिशयेन बलशून्य इव ज्ञानी । कामं विषयं । आकांक्षेत् कामं वांछति । इदं आश्चर्यं । कीदृशः अंतं कालमनु समीपे श्रितः । न हि समीप-वर्तिन्यंतकाले सति । विवेकिनो विषयतृष्णा युक्तेति भावः ॥ ७ ॥

०००००००००००००००००००००००००००००००००००००

२२१ इहामुत्र विरक्तस्य नित्यानित्यविवेकिनः ।
आश्चर्यं मोक्षकामस्य मोक्षादेव विभीषिका ॥८

२२१] इह अमुत्र विरक्तस्य नित्यानित्यविवेकिनः मोक्षकामस्य मोक्षात् एव विभीषिका आश्चर्यं ॥

२२२) ऐहिकामुष्मिकभोगविरक्तस्य नित्य-मात्मतत्त्वमनित्यं शरीरादिकं । तद्विवेकिनः । मोक्षः सच्चिदानंदस्तत्र कामोऽतःकरणं यस्य । एवंविधस्य ज्ञानिनोऽपि । मोक्षादेव असद्रूप-तनुधनवियोगादेव । विभीषिका भयं दृश्यते इति आश्चर्यं ॥ न हि स्वप्नदृष्टतनुधननाशेऽपि जाग्रतां भयं क्वापि दृष्टमिति भावः ॥ ८ ॥

२२३ एवमाक्षेपमुद्रया पूर्वमुक्तं । अथ ज्ञानिनस्तोषरोषावनुचिताविति कंठतो निरूपयति—

धीरस्तु भोज्यमानोऽपि पीड्यमानोऽपि सर्वदा
आत्मानं केवलं पश्यन्न तुष्यति न कुप्यति ॥९

२२४] धीरः तु भोज्यमानः अपि पीड्यमानः अपि सर्वदा आत्मानं केवलं पश्यन् न तुष्यति न कुप्यति ॥

२२५) धीरो ज्ञानी । लोकैर्विषयान् भोज्यमानोऽपि । तथा निंदादिना पीड्यमानोऽपि । सर्वदा । आत्मानं । केवलं सुखदुःखभोगादिरहितं । पश्यन्न तुष्यति न कुप्यति ॥ तोषरोषहेतूनां केवलात्मनि असंभवज्ञानादिति भावः ॥९॥

२२६ किं च । तोषरोषहेतूनां स्तुतिनिंदादीनां शरीरधर्मत्वाच्छरीरस्य चात्मभिन्नत्वेनानुसंधानात् । कथं ज्ञानिनस्तोषरोषावित्याह—

२२७
चेष्टमानं शरीरं स्वं पश्यत्यन्यशरीरवत् ।
संस्तवे चापि निंदायां कथं क्षुभ्येन्महाशयः १०

२२७] स्वं शरीरं चेष्टमानं अन्यशरीरवत् पश्यति महाशयः संस्तवे अपि च निंदायां कथं क्षुभ्येत् ॥

२२८) स्वं शरीरं । स्वात्मभिन्नचेष्टाश्रयत्वाद् अन्यशरीरवत् इति यः पश्यति स महाशयः संस्तवे स्तुतावपि । च निंदायां । कथं क्षुभ्येत् कथं तोषरोषरूपां विक्रियां व्रजेदित्याक्षेपः ॥ १० ॥

२२९ मार्यमारकयोरनित्यत्वानुसंधानात्संनिहिते ऽपि मृत्यौ ज्ञानिनस्त्रासः कथमित्याह—

२३३ **मायामात्रमिदं विश्वं पश्यन्विगतकौतुकः ।**
**अपि संनिहिते मृत्यौ कथं त्रस्यति धीरधीः ११**

२३०] इदं विश्वं मायामात्रं पश्यन् विगतकौतुकः धीरधीः सन्निहिते मृत्यौ अपि कथं त्रसति ॥

२३१) इदं दृश्यमानं । विश्वं मार्यमारकादिरूपं । समग्रं मायामात्रं असद्रूपं । पश्यन् अत एव । कुत इदं शरीरादिकं जायते । कुत्र विलयं यातीत्येवंरूपकौतुकरहितस्तथा धीरधीः धीरा स्वस्वरूपादचला धीरस्य सः । सन्निहिते मृत्यौ सति अपि । कथं त्रस्यति इत्याक्षेपः ॥ ११ ॥

---

२३२ सर्वेषामाक्षेपाणां समर्थनार्थं ज्ञानिनो निरुपमत्वमाह—

२३३
**निःस्पृहं मानसं यस्य नैराश्येऽपि महात्मनः ।**
**तस्यात्मज्ञानतृप्तस्य तुलना केन जायते ॥१२॥**

२३३] यस्य महात्मनः मानसं नैराश्ये अपि निःस्पृहं तस्य आत्मज्ञानतृप्तस्य केन तुलना जायते ॥

२३४) यस्य । नैराश्ये मोक्षे अपि । मानसं निःस्पृहं । तस्यात्मज्ञानतृप्तस्य ब्रह्माहमस्मीति जानतः समाप्तसर्वमनोरथस्य । केन समं तुलना जायते । न केनापीत्यर्थः ॥ १२ ॥

---

२३५ज्ञानिनः हानोपादानादिव्यवहारमाक्षिपति—

२३६ स्वभावादेव जानानो दृश्यमेतन्न किंचन ।
इदं ग्राह्यमिदं त्याज्यं स किं पश्यति धीरधीः१३

२३६] स्वभावात् एव जानानः दृश्यं किंचन न धीरधीः सः इदं ग्राह्यं इदं त्याज्यं एतत् किं पश्यति ॥

२३७) प्रपंचो मिथ्या । दृश्यत्वात् । शुक्तिकारजतवदित्यनुमानात् । एतत् दृश्यं न किंचन । न सन्नाप्यसदिति जानानो निश्चयवान्यो धीरधीः । स इदं ग्राह्यमिदं त्याज्यं इति । पश्यति इत्याक्षेपः ॥ १३ ॥

२३८ अत्र हेतुमाह—

अन्तस्त्यक्तकषायस्य निर्द्वन्द्वस्य निराशिषः ।
यदृच्छयागतो भोगो न दुःखाय न तुष्टये १४

२३९] अन्तस्त्यक्तकषायस्य निर्द्वन्द्वस्य निराशिषः यदृच्छया आगतः भोगः दुःखाय न तुष्टये न ॥

२४०) अंतःकरणात्त्यक्ताः कषायाः विषयवासना येन तस्य । निर्द्वन्द्वस्य शीतोष्णादिद्वन्द्वरहितस्य । अतएव निराशिषः विषयवासनाविहीनस्य । यदृच्छया दैवयोगात् । आगतः प्राप्तो । भोगः शब्दादिको विषयो । दुःखाय न भवति । तुष्टये च न भवति ॥ १४ ॥

॥ इति श्रीमदष्टावक्रविरचितायामष्टावक्रगीताभाषाटीकायां साक्षिव्यवहारनिर्णयं नाम तृतीयं प्रकरणं समाप्तम् ॥ ३ ॥

## ॥ अथ शिष्यप्रोक्तानुभवोल्लासः ॥ ४ ॥

गुरुणैवमुपाख्यातः शिष्यो ज्ञानदृशोल्लसन् ।
ज्ञानिनिश्शेषचेष्टानां स्पष्टमाचष्ट संभवम् ॥ १ ॥

२४१ एवं तावद्गुरुणा परीक्षार्थमाक्षिप्तः शिष्यः। प्रारब्धवशाद्बाधितानुवृत्त्या ज्ञानिन्यपिसर्वेव्यवहाराणामुपपत्तिमात्मज्ञानोल्लासवशादेवाह। षड्भिःश्लोकैः—

**हंतात्मज्ञस्य धीरस्य खेलतो भोगलीलया।**
**न हि संसारवाहीकैर्मूढैः सह समानता ॥१॥**

२४२] हंत आत्मज्ञस्य धीरस्य भोगलीलया खेलतः संसारवाहीकैः मूढैः सह न हि समानता ॥

२४३) हंत इति आत्मज्ञानोल्लसिते हर्षे। हे गुरो। आत्मज्ञस्य सर्वाधिष्ठानतया स्वात्मानं जानतः अत एव धीरस्य विषयैरविक्षिप्तचित्तस्य। भोगलीलया विषयभोगादिरूपया लीलया क्रीडया प्रारब्धवशात्प्रवृत्तया। खेलतः क्रीडतः। संसारवाहीकैः संसारवृत्तिपशुभिः। मूढैः देहाद्यात्मवेदिभिः सह। न हि समानता नैव तुल्यत्वं ॥ तदुक्तं भगवता "तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः॥ गुणा गुणेषु वर्त्तंत इति मत्वा न सज्जते" ॥ १ ॥

२४४ ननु संसारव्यवहारस्थो ज्ञानी । कथं न संसारितुल्य इत्याशंक्य । हर्षादिरहितत्वात्तस्य वैलक्षण्यमाह—

यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः ।
अहो तत्र स्थितो योगी न हर्षमुपगच्छति॥२॥

२४५] अहो शक्राद्याः सर्वदेवताः यत् पदं प्रेप्सवः दीनाः तत्र स्थितः योगी न हर्षं उपगच्छति ॥

२४६) अहो इति संबोधने । हे गुरो । यद्वा अहो आश्चर्ये । शक्राद्याः सर्वदेवताः अपि । यत्पदं प्रेप्सवः यत्पदं प्राप्तुमिच्छंतो । दीनाः तदप्राप्तितः शोच्या वर्त्तंते । तत्र सच्चिदानंदाख्ये पदे । स्थितः तत्त्वंपदार्थैक्यज्ञानात्तत्र वर्त्तमानो । योगी लब्धसाक्षात्कारो । विषयभोगात् न हर्षं प्राप्नोति । नापि तदपगमादुद्विग्नो भवतीत्यर्थः॥२॥

२४७ तत्त्वज्ञस्य विश्वकिंकरत्वं वक्तुं पुण्याद्यसंस्पर्शमाह—

तज्ज्ञस्य पुण्यपापाभ्यां स्पर्शो ह्यंतर्न जायते ।
न ह्याकाशस्य धूमेन दृश्यमानापि संगतिः ॥३

२४८] तज्ज्ञस्य पुण्यपापाभ्यां अंतः स्पर्शः न हि जायते ॥

२४९) तत्त्वंपदार्थैक्याभिज्ञस्य । पुण्यपापाभ्यां सह अंतःकरणधर्माणां स्पर्शः संबंधो न जायते । "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा" इति स्मृतेः ॥

२५० अत्र दृष्टांतमाह—

२५१] हि आकाशस्य धूमेन दृश्यमाना अपि संगतिः न ॥

२५२) यथा हि आकाशस्य धूमेन सह दृश्यमानापि संगतिः नास्ति । तथात्मज्ञस्य न पुण्यादिसंगतिरित्यर्थः ॥ ३ ॥

२५३ ननु कर्मणि कृते । कथं न पुण्यादि-स्पर्श इत्याशंक्य । ज्ञानिनो विधिनिषेधानियम्य-त्वमाह—

आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना ।
यदृच्छया वर्त्तमानं तं निषेद्धुं क्षमेत कः ॥४॥

२५४] येन महात्मना इदं सर्वं जगत् आत्मा एव ज्ञातं तं यदृच्छया वर्त्तमानं कः निषेद्धुं क्षमेत ॥

२५५) येन महात्मना । इदं दृश्यमानं । सर्वं जगत् । आत्मैव इति ज्ञातं । तं ज्ञानिनं । यदृच्छया प्रारब्धवशादेव वर्त्तमानं को वचःकलापो । निषेद्धुं प्रवर्त्तयितुं वा । क्षमेत समर्थो भवेत् । न कोऽपीत्यर्थः ॥ तदुक्तं शारीरक-भाष्ये "अविद्यावद्विषयो वेदः" इति । " प्रबोध-नीय एवासौ सुप्तो राजेव बंदिभिः" इति स्मृतिरपि ॥ ४ ॥

२५६ ननु ज्ञानिनोऽपि न यदृच्छया प्रवर्त्तते । किंत्विच्छानिच्छयोर्निवर्त्तयितुमशक्यत्वादित्याशंक्याह—

२५७ आब्रह्मस्तंबपर्यंते भूतग्रामे चतुर्विधे ।
विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविवर्जने॥५

२५७] आब्रह्मस्तंबपर्यंते चतुर्विधे भूतग्रामे विज्ञस्य एव हि इच्छानिच्छाविवर्जने सामर्थ्यम् ॥

२५८) यद्यपि । ब्रह्माणमारभ्य स्तंबपर्यंते । इच्छानिच्छे विवर्जयितुमशक्ये । तथापि । विज्ञस्यैव इच्छाद्वेषनिवर्त्तने सामर्थ्यमतो यदृच्छया प्रवर्त्तमानो ज्ञानी न विधिनिषेधनियम्य इत्यर्थः ५

००००००००००००००००००००००००००००००००

२५९ अद्वैतज्ञानेन द्वितीयस्य बाधितत्वात् ज्ञानिनां भयहेतुः कोऽपि नास्तीत्युपसंहरति—

२६ आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरम् ।
यद्वेत्ति तत्स कुरुते न भयं तस्य कुत्रचित् ॥६॥

२६०] कश्चित् जगदीश्वरम् आत्मानं अद्वयं जानाति

सः यत् वेत्ति तत् कुरुते तस्य कुत्रचित् भयं न ॥

२६१) कश्चित् सहस्रेषु एक एव जगदीश्वरं तत्पदार्थं आत्मानं त्वं पदार्थं अद्वयं अभिन्नतया जानाति । स यद्वेत्ति प्रारब्धवशाद्बाधितानुवृत्त्येदं कर्तव्यमिति मन्यते तत् करोति । एवं कुर्वतः तस्य कुत्रचित् इह वामुत्र वा भयं न अस्ति । भयहेतोर्द्वैतज्ञानबाधितत्वादिति भावः ॥ ६ ॥

इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायां शिष्यप्रोक्तानुभवोल्लासषट्कं नाम चतुर्थं प्रकरणं समाप्तम्॥४॥

## ॥ अथाचार्योक्तं लयचतुष्टयं नाम पंचमं प्रकरणं प्रारभ्यते ॥ ५ ॥

एवमुल्लासषट्केन स्वशिष्येऽपि परीक्षिते ।
गुरुर्दृढोपदेशार्थं लययोगमथाब्रवीत् ॥ १ ॥

२६२ एवमुल्लासपट्केन स्वशिष्ये परीक्षिते सति। पुनर्दृढोपदेशार्थमाचार्यो लयमुपदिशति। श्लोकचतुष्टयेन—

२६३
**न ते संगोऽस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि।**
**संघातविलयं कुर्वन्नेवमेव लयं व्रज ॥ १ ॥**

२६३] ते केन अपि संगः अस्ति न शुद्धः किं त्यक्तुं इच्छसि संघातविलयं कुर्वन् एवम् एव लयं व्रज ॥

२६४) हे शिष्य। शुद्धबुद्धस्वभावस्य तव केनापि देहगेहादिनाहंकारममकारास्पदेन न संगोऽस्ति। अतः शुद्धः असंगस्त्वं। किं त्यक्तुं। किमुपादातुं च इच्छसि । तस्मात् संघातस्य देहस्य विलयं कुर्वन् अहं देहीति निरसनं कुर्वन्। एवं देहादिनिरसनरूपं एव लयं व्रज ॥१

२६५
उदेति भवतो विश्वं वारिधेरिव बुद्बुदः ।
इति ज्ञात्वैकमात्मानमेवमेव लयं व्रज ॥ २ ॥

२६५] वारिधेः बुद्बुदः इव भवतः विश्वं उदेति । इति एकं आत्मानं ज्ञात्वा एवम् एव लयं व्रज ॥

२६६) हे शिष्य । भवतः सकाशात् । विश्वं उदेति भवदभिन्नमेव । यथा वारिधेः सकाशात् बुद्बुदो वारिधेरभिन्न एव उदेति । इति एवं-प्रकारेण । एकं सजातीयादिभेदरहितं । आत्मानं ज्ञात्वा । एवमेव एकात्मज्ञानमेव । लयं व्रज॥२

००००००००००००००००००००००००००००००

२६७ ननु प्रत्यक्षतो भिन्नतया हारसर्पादिभेदे प्रतीयमाने कथं हारादिविलय इत्यत्राह—

२६८
प्रत्यक्षमप्यवस्तुत्वाद्विश्वं नास्त्यमले त्वयि ।
रज्जुसर्प इव व्यक्तमेवमेव लयं व्रज ॥ ३ ॥

२६८] प्रत्यक्षं अपि व्यक्तं विश्वं अमले त्वयि न अस्ति रज्जुसर्पः इव अवस्तुत्वात् एवम् एव लयं व्रज ॥

२६९) प्रत्यक्षमपि व्यक्तं दृश्यं विश्वं। अमले त्वयि। नास्ति एव। अवस्तुत्वात्। रज्जुभुजंगवत्। तस्मात् एवमेव लयं व्रज॥ द्वितीयस्य हेयोपादेयस्यैवाभावादित्यर्थः ॥ ३ ॥

ooooooooooooooooooooooooooooooo

^२७०^ समदुःखसुखः पूर्ण आशानैराश्ययोः समः।
समजीवितमृत्युः सन्नेवमेव लयं व्रज ॥ ४ ॥

२७०] पूर्णः समदुःखसुखः आशानैराश्ययोः समः समजीवितमृत्युः सन् एवं एव लयं व्रज ॥

२७१) पूर्ण आत्मानंदपूर्णस्त्वमत एव। दैववशादुद्भूतयोः सुखदुःखयोः समः। आशानैराश्ययोः च समः। तथा जीविते मृत्यौ वा समः निर्विकारः। सुखदुःखादीनामनात्मधर्माणां तुच्छत्वानुसंधानात्त्वं सुखदुःखादिषु समः। ब्रह्मदृष्टिरूपं लयं व्रज इत्यर्थः ॥ ४ ॥

इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायामाचार्योक्तं लयचतुष्टयं नाम पंचमं प्रकरणं समाप्तम् ॥ ५ ॥

# ॥ अथ शिष्योक्तमुत्तरचतुष्कं नाम षष्ठं प्रकरणं प्रारभ्यते ॥ ६ ॥

गुरुणैवं परीक्षार्थमुपदिष्टे लये सति ।
पूर्णात्मनो लयादीनां शिष्योऽसंभवमब्रवीत् ॥ १ ॥

२७२ तदेवं गुरुणात्यंतपरीक्षार्थं लययोगे समुपदिष्टे सति । लयायमात्रोपपादकमात्मज्ञान-मनुवदन्नेव शिष्यः । पूर्णात्मनो लयाद्यसंभवमाह । चतुर्भिः श्लोकैः—

आकाशवदनंतोऽहं घटवत्प्राकृतं जगत् ।
इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः १

२७३] अहं आकाशवत् अनंतः ॥

२७४) अहं आत्मा । आकाशवदनंतः ॥

२७५ नन्वनंतस्यात्मनो देहादिनिवासः कथ-मित्यत आह—

२७६] प्राकृतं जगत् घटवत् ॥

२७७) प्राकृतं प्रकृतिकार्यं । जगत् देहादिकं । घटवत् । यथा घट आकाशस्यावच्छेदको निवासस्थानं च । तथात्मनो देहादिरेकदेशावच्छेदक एव । व्योम्न इव घटादिरित्यर्थः ॥

२७८ अत्र प्रमाणमाह—

२७९] इति ज्ञानं ॥

२८०) इति एवं । वेदांतसिद्धं ज्ञानं अनुभवरूपमत्र प्रमाणमतो नान्यथाभावशंकेत्यर्थः ॥

२८१] तथा एतस्य त्यागः न ग्रहः लयः न ॥

२८२) तथा सत्यात्मनोऽनंतत्वे सति । एतस्य आत्मनः । त्यागो । ग्रहणं । लयः च । न संभवति । परिच्छिन्नस्यैव घटादेस्त्यागादिदर्शनादित्यर्थः ॥ १ ॥

२८३ घटाकाशदृष्टान्ते देहात्मनोर्भेदशंका स्यादित्यपरितोषादाह—

[२८४]
**महोदधिरिवाहं स प्रपंचो वीचिसन्निभः ।**
**इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥२॥**

२८४] महोदधिः इव अहं सः प्रपंचः वीचिसन्निभः इति ज्ञानं तथा एतस्य न त्यागः ग्रहः लयः न ॥

२८५) महोदधिः इति स्पष्टं ॥ २ ॥

०००००००००००००००००००००००००००००००

२८६ समुद्रवीचिदृष्टान्ते देहात्मनोर्विकार-विकारिशंका स्यादित्यपरितोषादाह—

[२८७]
**अहं स शुक्तिसंकाशो रूप्यवद्विश्वकल्पना ।**
**इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥३॥**

२८७] अहं सः शुक्तिसंकाशः रूप्यवत् विश्वकल्पना इति ज्ञानं तथा एतस्य न त्यागः ग्रहः लयः न ॥

२८८) स्पष्टं ॥ ३ ॥

२८९ शुक्तिदृष्टांतेऽप्यात्मनि परिच्छिन्नत्व-शंका स्यात्तद्व्यावृत्त्यर्थमाह—

२९०
अहं वा सर्वभूतेषु सर्वभूतान्यथो मयि ।
इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ॥४॥

२९०] अहं वा सर्वभूतेषु अथ सर्वभूतानि मयि इति ज्ञानं तथा एतस्य न त्यागः ग्रहः लयः न ॥

२९१) अहं वा अहमेव। सर्वभूतेषु प्रकृति-प्राकृतिकेषु । सत्तास्फूर्त्यादिप्रदत्वेनास्मि । अथ अतो हेतोः। सर्वभूतानि। अधिष्ठानभूते मयि। वर्तंत इति ज्ञानं वेदांतसिद्धं । तथा सत्यात्मन-स्त्यागादिकं न संभवतीत्यर्थः ॥ ४ ॥

॥ इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायां शिष्यप्रोक्तमुत्तरचतुष्कं नाम षष्ठं प्रकरणं समाप्तम् ॥ ६ ॥

# ॥ अथानुभवपंचकं नाम सप्तमं प्रकरणं प्रारभ्यते ॥ ७ ॥

लययोगाननुष्ठाने व्यवहारं निरंकुशम् ।
आशंक्य शिष्यः स्वोल्लासादब्रवीद्गुरुमुत्तमम् ॥१॥

२९२ ननु लययोगाभावे संसारविक्षेपो निरंकुशः प्रसरः स्यादित्याशंक्य । तस्यानिष्टत्वाभावमनुभवपंचकेनोत्तरमाह शिष्यः—

[२९३] मय्यनंतमहांभोधौ विश्वपोत इतस्ततः ।
भ्रमति स्वांतवातेन न ममास्त्यसहिष्णुता॥१॥

२९३] मयि अनंतमहांभोधौ विश्वपोतः स्वांतवातेन इतस्ततः भ्रमति मम असहिष्णुता न अस्ति ॥

२९४) हे गुरो । मयि आत्मनि । अनंते महासमुद्रे । विश्वाख्यः पोतो नौका । स्वांतवातेन मनः पवनेन । इतस्ततो भ्रमति । अत्र मम असहिष्णुता असहनशीलता । न अस्ति । समुद्रस्येव नौकापरिभ्रमण इत्यर्थः ॥ १ ॥

२९५ जगद्व्यवहारस्यानिष्टत्वाभावः पूर्व-मुक्तः। अथ जगदुदयापगमयोरपि नानिष्टतेत्याह—

**[२९६]मय्यनंतमहांभोधौ जगद्वीचिः स्वभावतः।**
**उदेतु वास्तमायातु न मे वृद्धिर्न च क्षतिः ॥२॥**

२९६] मयि अनंतमहांभोधौ जगद्वीचिः स्वभावतः उदेतु वा अस्तं आयातु मे न वृद्धिः न च क्षतिः ॥

२९७) आत्मनि। अनंते विनाशरहिते। महति व्यापके अंभोधौ समुद्रे।जगदाख्या वीचिः। स्वभावतः दृश्यत्वादिस्वभावात्। उदेतु। वा परं। अस्तमायातु। मम तदुदये वृद्धिर्न अस्ति। व्यापकत्वात्तदपगमे च क्षतिर्न अस्ति। अनंतत्वादित्यर्थः॥२॥

२९८ पूर्वं दृष्टांतेन स्वात्मनः जगद्विकार इति भ्रमपरिणामित्वं स्यात्तद्वारणार्थमाह—

**[२९९]मय्यनंतमहांभोधौ विश्वं नाम विकल्पना।**
**अतिशांतो निराकार[३०२] एतदेवाहमास्थितः ॥३॥**

२९९] मयि अनंतमहांभोधौ नाम विश्वं विकल्पना अतिशांतः॥

३००) मय्यनंतमहांभोधौ। नाम प्रसिद्धं। विश्वं। कल्पना भ्रममात्रमेव। न तु तात्त्विकं॥अतः-कारणात्। अहं अतिशांतः प्रपंचोपप्लवरहितः॥

३०१ अत्र हेतुमाह—

३०२] निराकारः एतद् एव अहं आस्थितः॥

३०३) एतद् आत्मज्ञानं एव। अहमा-स्थितः आश्रितो। न तु लययोगं। तस्य पूर्व-मेव दूषितत्वात्॥ ३॥

३०४ अतिशांतत्वमेव स्पष्टयति—

३०५नात्मा भावेषु नो भावस्तत्रानंते निरंजने।
इत्यसक्तोऽस्पृहः शांत एतदेवाहमास्थितः॥४॥

३०५] आत्मा भावेषु न। भावः तत्र अनंते निरंजने न इति अहं असक्तः अस्पृहः शांतः एतत् एव आस्थितः॥

३०६) आत्मा भावेषु देहादिषु। आधेयतया न अस्ति। व्यापकत्वात्॥ भावो देहादिः। तत्र आत्मनि। नास्ति। अनंते निरंजने सति। इति

कारणात् । अहं असक्तः संसर्गरहितः । अत एव अस्पृह इच्छादिधर्मासंश्लिष्टोऽत एव शांत इत्यर्थः ४

०००००००००००००००००००००००००००००

२०७ इच्छादिरहितत्वे हेत्वंतरमप्याह—

३०८
अहो चिन्मात्रमेवाहमिंद्रजालोपमं जगत् ।
अतो मम कथं कुत्र हेयोपादेयकल्पना ॥ ५ ॥

३०८] अहो चिन्मात्रं एव अहं जगत् इंद्रजालोपमं अतः मम कुत्र कथं हेयोपादेयकल्पना ॥

२०९) अहो इत्याश्चर्यरूपमलौकिकं । चिन्मात्रं चैतन्यमात्रं । एवाहं । जगत् सर्वं प्रपंचजातं । इंद्रजालोपमं दर्शनकालेऽपि पृथक् सत्तारहितं । अस्य विश्वस्य पृथक् सत्तारहितत्वात् । मम कुत्र वस्तुनि । कथं केन प्रकारेण । हेयोपादेयबुद्धिः स्यान्न कुत्रापीत्यर्थः ॥ ५ ॥

॥ इति श्रीमद्विश्वे० मनुभवपंचकविवरणं नाम सप्तमं प्रकरणं समाप्तम् ॥ ७ ॥

# ॥ अथ गुरुप्रोक्तं बंधमोक्षव्यवस्था-चतुष्कं नामाष्टमं प्रकरणं प्रारभ्यते ॥ ८ ॥

इत्थं परीक्षितज्ञानं शिष्यमेवाभिनंदितुम् ।
गुरुर्बंधस्य मोक्षस्य व्यवस्थां सम्यगब्रवीत् ॥ १ ॥

३१० तदेवं षड्भिः प्रकरणैः । स्वशिष्यं सम्यक् परीक्ष्य । बंधमोक्षव्यवस्थानिरूपणव्याजेन गुरुः । स्वशिष्यानुभवमभिनंदति। चतुर्भिःश्लोकैः—

**"तदा बंधो यदा चित्तं किंचिद्वांछति शोचति ।**
**किंचिन्मुंचति गृह्णाति किंचिद्धृष्यतिं कुप्यति १**

३११] चित्तं यदा किंचित् वांछति शोचति किंचित् मुंचति गृह्णाति किंचित् हृष्यति कुप्यति तदा बंधः ॥

३१२) हे शिष्य । "अतो मम कथं कुत्र हेयोपादेयकल्पना" इत्यंतं यत्त्वयोक्तं । तत्तथैव यतः चित्तं यदा विषयवांछादिविकारवद्भवति । तदा एव जीवस्य बंध इत्यर्थः ॥ १ ॥

[३१३] तदा मुक्तिर्यदा चित्तं न वांछति न शोचति ।
न मुंचति न गृह्णाति न हृष्यति न कुप्यति ॥२॥

३१३] यदा चित्तं न वांछति न शोचति न मुंचति न गृह्णाति न हृष्यति न कुप्यति तदा मुक्तिः ॥

३१४) यदा चित्तं वांछादिविकारातीतं । तदा मुक्तिः इत्यर्थः ॥ २ ॥

---

३१५ तदेवं पृथक् बंधमोक्षावुक्तौ । अथ समुच्चयेन बंधमोक्षावाह—

[३१६] तदा बंधो यदा चित्तं सक्तं कास्वपि दृष्टिषु ।
तदा मोक्षो यदा चित्तमसक्तं सर्वदृष्टिषु ॥ ३ ॥

३१६] यदा चित्तं कासु अपि दृष्टिषु सक्तं तदा बंधः यदा चित्तं सर्वदृष्टिषु असक्तं तदा मोक्षः ॥

३१७) यदा चित्तं कास्वपि अनात्मदृष्टिषु । संसक्तं । तदा बंधः ॥ यदा चित्तं सर्वास्वपि विषयदृष्टिषु । संसक्तं न भवति । तदा मोक्ष इत्यर्थः ॥ ३ ॥

३१८ अस्तु वा बाधितानुवृत्त्या दग्धपटोपमाना सर्वोपि विषयदृष्टिर्बंधहेतुस्तन्निवृत्तौ मोक्ष इति पूर्व-मुक्तं । तथाप्यहंकारनिवृत्तौ । मोक्षस्तदनिवृत्तौ बंध इति वदन्नेव शिष्योक्तमर्थमभिनंदितुमनुवदति—

३१९ यदा नाहं तदा मोक्षो यदाहं बंधनं तदा ।
मत्वेति हेलया किंचिन्मा गृहाण विमुंच मा॥४॥

३१९] यदा अहं न तदा मोक्षः यदा अहं तदा बंधनं इति मत्वा हेलया किंचित् मा गृहाण मा विमुंच॥

३२०) यदाहं इत्येवंरूपोऽहंकाराध्यासोऽनर्थ-मूलभूतो निवर्त्तते तदा मोक्षः ॥ यदा च सो-ऽनुवर्त्तते तदा बंधनं इति ज्ञात्वा । हेलया अनाया-सेनैव हानोपादानादिक्रियाणामकर्ता त्वमसि । अ-कर्त्रात्मज्ञानेन कर्तृत्वाभिमानो निवर्त्तत इति भावः ४

॥ इति श्रीमद्वि० गुरुप्रोक्तं बंधमोक्षचतुष्कं नामाष्टमं प्रकरणं समाप्तम् ॥ ८ ॥

# ॥ अथ निर्वेदाष्टकं नाम नवमं प्रकरणं ॥ ९ ॥

शिष्योक्तानुभवस्यैव दार्ढ्यार्थं गुरुणोच्यते ।
निर्वेदः स्पष्टमष्टाभिरिच्छादित्यजनात्मकः ॥ १ ॥

३२१ " मत्वेति हेलया किंचिन्मा गृहाण " इति यदुक्तं । तत्र किं द्वारमित्यपेक्षायां । गुरुरनुमोदनमुद्रया वैराग्याष्टकमाह—

[३२२] कृताकृते च द्वंद्वानि कदा शांतानि कस्य वा ।
एवं ज्ञात्वेह निर्वेदाद्भव त्यागपरोऽव्रती ॥१॥

३२२] कृताकृते द्वंद्वानि च कस्य कदा वा शांतानि एवं ज्ञात्वा इह निर्वेदात् त्यागपरः भव अव्रती ॥

३२३) कृताकृते इदं कर्त्तव्यमिदमकर्त्तव्यमित्यभिनिवेशौ । द्वंद्वानि सुखदुःखादीनि । कस्य । कदा वा । शांतानि निवृत्तानि । अपि तु न कस्यापि कदापि शांतानीत्यर्थः ॥ एवं ज्ञात्वा ।

इह कृताकृतादिषु । निर्वेदात् अभिनिवेशादि-
परित्यागादेव । त्यागपरो भव । कीदृशस्त्वं
अव्रती नास्ति व्रतं कुत्रापि आग्रहो यस्य सः॥१॥

३२४ चित्तधर्मत्यागरूपो निर्वेदस्तु कस्य-
चिदेव स्यान्न तु सर्वस्येत्याह—

**[३२५] कस्यापि तात धन्यस्य लोकचेष्टावलोकनात् ।**
**जीवितेच्छा बुभुक्षा च बुभुत्सोपशमं गताः॥२॥**

३२५] तात कस्य अपि धन्यस्य लोकचेष्टावलोकनात्
जीवितेच्छा च बुभुक्षा बुभुत्सा उपशमं गताः ॥

३२६) हे तात शिष्य । सहस्रेषु मध्ये कस्य-
चिदेव धन्यस्य उत्पत्तिविनाशरूप-लोकचेष्टा-
वलोकनात् । जीवितेच्छा-भोगेच्छाज्ञानेच्छा-
दयः। उपशमं गताः ॥ इदं तु तादृशं निर्वेदसंपन्न-
शिष्यमभिनंदितुमेवोच्यते । न तूपदिश्यते इति
प्रागुक्तमेव ॥ २ ॥

३२७ ननु ज्ञानिनां सर्वत्रेच्छोपशमः किं हेतुक इत्यत आह—

[३२८]
**अनित्यं सर्वमेवेदं तापत्रितयदूषितम् ।**
**असारं निंदितं हेयमिति निश्चित्य शाम्यति ३**

३२८] इदं सर्वं एव अनित्यं तापत्रितयदूषितं असारं हेयं निंदितं इति निश्चित्य शाम्यति ॥

३२९) इदं दृश्यमानं सर्वप्रपंचजातं । अनित्यं चैतन्येऽध्यस्तं । तथा पृथक् सत्त्वेन गृह्यमाणं सत् आध्यात्मिकाधिदैविकाधिभौतिकतापत्रयदूषितं । अत एव असारं तुच्छमसत् एव । हेयं पृथक्सत्तया नैवादरणीयं । इति निश्चित्य । ज्ञानी शाम्यति कुत्रापीच्छां न कुरुते ॥ ३ ॥

३३० द्वंद्वानामारब्धकर्मवशादवश्यं भावित्वात् । तत्रेच्छानिच्छे विहाय यथाप्राप्तभोगी मुक्तिमवाप्नुयादित्याह—

३३१
**कोऽसौ कालो वयः किंवा यत्र द्वंद्वानि नो नृणाम्**
**तान्युपेक्ष्य यथाप्राप्तवर्ती सिद्धिमवाप्नुयात्॥४॥**

३३१] यत्र नृणां द्वंद्वानि न असौ कः कालः वा किं वयः तानि उपेक्ष्य यथाप्राप्तवर्ती सिद्धिं अवाप्नुयात्॥

३३२) यत्र नृणां द्वंद्वानि सुखदुःखादीनि न संति । असौ कः कालः॥ का वा वाल्यादिवयोलक्षणा शरीरावस्था । अपि तु न कापीति विचार्य । तानि द्वंद्वानि । उपेक्ष्य तत्रेच्छामकृत्वा । यथाप्राप्तेष्वनासक्ततया वर्त्ती । सिद्धिं मुक्तिं अवाप्नुयात् इत्यर्थः ॥ ४ ॥

३३३ तर्कशास्त्रादिज्ञानेषु निष्ठा न कर्त्तव्या। नानाविप्रतिपत्तिग्रस्तत्वान्नापि कर्मसु नाप्यष्टांग-योगादिष्वित्याह—

[334]नाना मतं महर्षीणां साधूनां योगिनां तथा।
दृष्ट्वा निर्वेदमापन्नः को न शाम्यति मानवः॥५॥

३३४] महर्षीणां साधूनां तथा योगिनां मतं नाना दृष्ट्वा निर्वेदम् आपन्नः कः मानवः शाम्यति न ॥

३३५) महर्षीणां गौतमजैमिनिप्रभृतीनां। मतं। नानाविधं परिच्छिन्नं। दृष्ट्वा। तर्कशास्त्रादि-भ्यो निर्वेदमापन्नः। तथा साधूनां कर्म-निष्ठानां मतं नानाविधं। केचिद्धोमपराः। केचिज्जप-पराः। केचित् कृच्छ्रचांद्रायणादिपराः। इति नाना-विधं मतं दृष्ट्वा। कर्मभ्योऽपि निर्वेद-मापन्नः केवलमात्मानुसंधाननिष्ठः। को न शाम्यति कः सुखं न प्राप्नोतीत्यर्थः॥ ५॥

२२६ केवलं ज्ञाननिष्ठानेवाखिल कर्मादिकं ना कुर्वित्याह—

कृत्वा मूर्तिपरिज्ञानं चैतन्यस्य नकिंगुरुः ।
निर्वेदसमतायुक्त्या यस्तारयति संसृतेः ॥६॥

२२७] निर्वेदसमतायुक्त्या चैतन्यस्य मूर्तिपरिज्ञानं कृत्वा नकिंगुरुः यः संसृतेः तारयति ॥

२२८) निर्वेदसमतायुक्त्या निर्वेदो नाम विषयाणामनित्यत्वबुद्ध्या विषयेषु समता सर्वभूतेषु बुद्धिर्युक्तिर्नाम गुरुमुखात्प्राप्तोपदेशः तैः । चैतन्यस्य सच्चिदानंदस्य । मूर्तिपरिज्ञानं स्वरूप-साक्षात्कारं । कृत्वा । तदनंतरं नास्ति कश्चिद्गुरुर्यस्य स नकिंगुरुः । एवंविधो यः । स संसृतेः सकलाज्ञानात् तारयति ॥ ६ ॥

२३९ चेतनस्य स्वरूपज्ञानोपायमाह—

२४० पश्य भूतविकारांस्त्वं भूतमात्रान् यथार्थतः ।
तत्क्षणाद्बंधनिर्मुक्तः स्वरूपस्थो भविष्यसि ॥७

२४०] त्वं भूतविकारान् यथार्थतः भूतमात्रान् पश्य तत्क्षणात् बंधनिर्मुक्तः स्वरूपस्थः भविष्यसि ॥

२४१) हे शिष्य । भूतविकारान् देहेंद्रियादीन् । यथार्थतः तत्त्वतः । भूतमात्रान् । पश्य । न तु आत्मस्वरूपान् ॥ एवं सति । त्वं तत्क्षणाद्बंधनिर्मुक्तः शरीराहंभावनिर्मुक्तः सन् । शरीरादिविविक्तात्मस्वरूपस्थो भविष्यसि ॥ शरीरादावनात्मतया ज्ञाते सति । तत्साक्षीभूत आत्मा झटिति सुज्ञेय इति भावः ॥ ७ ॥

३४२ नन्वेवमात्मनि ज्ञातेऽपि । तत्र निष्ठा कथं स्यादित्याशंक्य । वासनात्यागादित्याह—

**वासना एव संसार इति सर्वा विमुंच ताः ।**
**तत्त्यागो वासनात्यागात्स्थितिरद्य यथा तथा८**

३४३] वासना एव संसारः इति सर्वाः ताः विमुंच वासनात्यागात् तत्त्यागः अद्य स्थितिः यथा तथा ॥

३४४) वासना विषयवासना । एव संसार इति कारणात् । ता वासनास्त्वं विमुंच ॥ वासनात्यागात् च आत्मनिष्ठायां सत्यां । तस्य संसारस्य त्याग इत्यर्थः ॥ अद्य अधुना । वासनात्यागे सति । स्थितिर्यथा तथा यथा प्रारब्धं तथैवेत्यर्थः ॥ ८ ॥

इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतानां गुरुप्रोक्तं निर्वेदाष्टकं नाम नवमं प्रकरणं समाप्तम् ॥ ९ ॥

## ॥ अथ गुरुप्रोक्तमुपशमाष्टकं नाम दशमं प्रकरणं प्रारभ्यते ॥ १० ॥

विषयाणामभावेऽपि तुष्टिर्निर्वेद ईरितः ॥
तत्सिध्यर्थे च विषये वैतृष्ण्यं शांतिरीर्यते ॥ १ ॥

३४५ विषयैर्विनापि संतोषरूपो निर्वेदः प्रागुक्तः । अथेदानीं विषयतृष्णोपशममभिनंदनमुद्रया गुरुरुदाहरति—

**विहाय[३४६] वैरिणं काममर्थं चानर्थसंकुलम् ।**
**धर्ममप्येतयोर्हेतुं सर्वत्रानादरं कुरु ॥ १ ॥**

३४६] कामं वैरिणं च अनर्थसंकुलं अर्थं एतयोः हेतुं धर्मं अपि विहाय सर्वत्र अनादरं कुरु ॥

३४७) कामं वैरिणं ज्ञानशत्रुं विहाय । तथा अनर्थसंकुलं अर्जने रक्षणे व्यये वानेकशोकदुःखसंकुलं । अर्थं विहाय । तथा । एतयोः अनयोः कामार्थयोः । हेतुं । धर्ममपि विहाय । सर्वत्र त्रिवर्गहेतुकर्मसु । अनादरं उपेक्षां । कुरु ॥ १ ॥

३४८ ननु मित्रक्षेत्रादिफलकेषु कर्मसु । कथमनादरः इत्याशंक्य । मित्रादीनामनित्यत्वमाह—

स्वमेंद्रजालवत्पश्य दिनानि त्रीणि पंच वा ॥
मित्रक्षेत्रधनागारदारदायादिसंपदः ॥ २ ॥

३४९] मित्रक्षेत्रधनागारदारदायादिसंपदः स्वमेंद्रजालवत् पश्य त्रीणि वा पंच दिनानि ॥

३५०) हे शिष्य । मित्रादि-संपदः स्वमेंद्रजालवत्पश्य । यतो दिनानि । त्रीणि । पंच वा । स्थायिन्य इत्यर्थः ॥ २ ॥

०००००००००००००००००००००००००००००००००००

३५१ सर्वत्रानादरं कुरु इत्यनेनोक्तं वैतृष्ण्यं पुरुषार्थहेतुरित्याह—

यत्र यत्र भवेत्तृष्णा संसारं विद्धि तत्र वै ।
प्रौढवैराग्यमाश्रित्य वीततृष्णः सुखी भव ॥३॥

३५२] यत्र यत्र तृष्णा भवेत् तत्र वै संसारं विद्धि । प्रौढवैराग्यं आश्रित्य वीततृष्णः सुखी भव ॥

३५३) यत्र यत्र येषु प्रसिद्धेषु विषयेषु। तृष्णा

भवेत् । तत्र तत्र तमेव । संसारं विद्धि । विषयतृष्णाया एव कर्मद्वारा संसारहेतुत्वात् ॥ अतः प्रौढवैराग्यं प्राप्तेऽप्यर्थे प्रीत्यभावमास्थाय । वीततृष्णः अप्राप्तार्थेच्छारहितः सन्नात्मनिष्ठया सुखी भव इत्यर्थः ॥ ३ ॥

---

३५४ अमुमेवार्थं भंग्यंतरेणाह—

[३५५] तृष्णामात्रात्मको वंधस्तन्नाशो मोक्ष उच्यते ।
[३५८] भवासंसक्तिमात्रेण प्राप्तितुष्टिर्मुहुर्मुहुः ॥ ४ ॥

३५५] तृष्णामात्रात्मकः वंधः तन्नाशः मोक्षः उच्यते॥

३५६) तृष्णामात्रस्वरूप एव वंधः । कर्मवासनाद्वारा वंधहेतुत्वात् ॥ तन्नाशः तृष्णानाश एव । मोक्षो निवृत्तिहेतुत्वात् ॥

३५७ " तन्नाशो [क्षेण "?] इत्यत्र हेतुमाह—

३५८] भवासंसक्तिमात्रेण मुहुर्मुहुः प्राप्तितुष्टिः ॥

३५९) भवतीति भवो देहादिविषयस्तत्र देहादिविषये संगाभावमात्रेण । मुहुर्मुहुः वारं

वारं। प्राप्तितुष्टिः आत्मप्राप्तिजः संतोषः स्यादतः तृष्णापगमे मोक्ष इत्यर्थः। प्राप्तिस्तुष्टिरिति पाठे प्राप्तिः स्यात्तुष्टिश्च स्यादित्यर्थः ॥ ४ ॥

oooooooooooooooooooooooooooo

३६० ननु बुभुक्षारूपा तृष्णा कथं त्याज्येत्याशंक्याह—

स्वमेकश्चेतनः शुद्धो जडं विश्वमसत्तथा।
अविद्यापि न किंचित्सा का बुभुत्सा तथापि ते ५

३६१] त्वं एकः चेतनः शुद्धः विश्वं जडं असत् तथा सा अविद्या अपि तथा अपि ते किंचित् बुभुत्सा का॥

३६२) इह जगति त्रय एव पदार्थाः आत्मा जगदविद्या च। तत्र आत्मा तावत् त्वं एव एकश्चेतनः शुद्धो न तु चिद्भिन्न इति स्वात्मानमेव एकं पूर्ण जानीहि। न अन्या पुनरात्मबुभुत्सा युक्ता नापि जगद्बुभुत्सा। जगतः असत्त्वात् जडत्वाच्च। नापि अविद्याबुभुत्सा युक्ता। तस्या अपि सदसद्विलक्षणरूपतयानिर्वचनीयत्वात् तथा च। तव बुभुत्सापि का युक्ता। न काचिदपीत्यर्थः ५

३६३ जडं विश्वमसत् इत्युक्तं तद्दिशदयति—

**राज्यं सुताः कलत्राणि शरीराणि सुखानि च।**
**संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि॥६॥**

३६४] राज्यं सुताः कलत्राणि शरीराणि च सुखानि संसक्तस्य अपि तव जन्मनि जन्मनि नष्टानि ॥

३६५) राज्यादीनि सर्वाणि । संसक्तस्यापि आसक्तिं कुर्वाणस्यापि तव । जन्मनि जन्मनि नानाजन्मसु । नष्टानि इत्यतो विश्वमसदित्यर्थः ६

oooooooooooooooooooooooooooooooo

३६६ बुभुत्सापि न कर्त्तव्या इति प्रागुक्तमथ धर्मार्थकामेष्वपीच्छा न कार्येत्याह—

**अलमर्थेन कामेन सुकृतेनापि कर्मणा ।**
**एभ्यः संसारकांतारे न विश्रान्तमभून्मनः॥७॥**

३६७] अर्थेन कामेन सुकृतेन कर्मणा अपि अलं ॥

३६८) अर्थादिना अलं । अर्थधर्मकामेषु इच्छा न कार्येत्यर्थः ॥

३६९ अत्र हेतुमाह—

३७०] संसारकांतारे मनः एभ्यः विश्रांतं न अभूत् ॥

३७१) यतः कारणात् । संसारकांतारे संसार-लक्षणे दुर्गमे वर्त्मनि भ्राम्यतस्तव । एभ्यः धर्मकामार्थेभ्यः । विश्रांतिर्भ्रमणविच्छेदो नाभूत् अतो अर्थादिषु न तृष्णा कर्तव्येत्यर्थः ॥ ७ ॥

०००००००००००००००००००००००००००००००

३७२ तृष्णाया उपशमः प्रागुक्तः । अथ क्रियामात्रोपशमनमाह—

३ ६ ३
कृतं न कति जन्मानि कायेन मनसा गिरा ।
दुःखमायासदं कर्म तदद्याप्युपरम्यताम् ॥८॥

३७३] आयासदं दुःखं कर्म कायेन मनसा गिरा कति जन्मानि न कृतं तत् अद्यापि उपरम्यताम् ॥

३७४) हे शिष्य । आयासदं प्रयासदं । अत एव दुःखदं कर्म कायादिना कति जन्मानि न कृतं । अपि तु यावदद्य प्राचीनसर्वजन्मस्वपि कृतकर्मणा तु त्वयानर्थ एव लब्धः । तत् तस्मात् । अद्यापि अधुनापि । कर्मभ्य उपरम्यताम् ॥ ८ ॥

इति गुरुशोकानुपशमाष्टकं नाम दशमं प्रकरणं समाप्तम् ॥ १० ॥

## ॥ अथ ज्ञानाष्टकं नामैकादशं प्रकरणं प्रारभ्यते ॥ ११ ॥

उक्ता शांतिर्न विज्ञानं विना कस्यापि जायते ।
इति निश्चितुमेवाह गुरुर्ज्ञानामृताष्टकम् ॥ १ ॥

३७५ उक्ता शांतिर्विज्ञानादेव स्यान्न त्वन्यथेति बोधयितुं ज्ञानाष्टकमाह । तत्रादौ ज्ञानसाधनान्याह—

**३७६ भावाभावविकारश्च स्वभावादिति निश्चयी ।**
**निर्विकारो गतक्लेशः सुखेनैवोपशाम्यति ॥१॥**

३७६] भावाभावविकारः स्वभावात् इति निश्चयी निर्विकारः च गतक्लेशः सुखेन एव उपशाम्यति ॥

३७७) भावाभाव-रूपो विकारः स्वभावात् मायातत्संस्कारादेव जायते । न तु निर्विकारादात्मन इति निश्चयवान्पुरुषो । निश्चयबलादेव सुखेन अनायासेन । एवोपशाम्यति ॥१॥

३७८ ननु मायाया जडत्वात्तत एव कथं भावाभावविकार इत्याशंक्याह—

ईश्वरः सर्वनिर्माता नेहान्य इति निश्चयी ।
अंतर्गलितसर्वाशः शांतः क्वापि न सज्जते ॥२॥

३७९] इह ईश्वरः सर्वनिर्माता अन्य न इति निश्चयी अंतर्गलितसर्वाशः शांतः क्व अपि सज्जते न ॥

३८०) ईश्वरः एव सर्वनिर्माता न तु अन्यो जीवः ईश्वरपरवशत्वात् । इति निश्चयी पुरुषो निश्चयवशादेव अंतर्गलितसर्वाशः गतसर्वतृष्णः । अत एव शांतो निश्चलचित्तः सन् । क्वापि न सज्जते ॥ २ ॥

०००००००००००००००००० ००००००००००००

३८१ ननु ईश्वर एव चेत् सर्वनिर्माता । तर्हि कांश्चिद्दरिद्रान् । कांश्चित्तु धनिनस्तथा कांश्चित्सुखिनः कांश्चिद्दुःखिनो रचयतस्तस्य । वैषम्यनैर्घृण्ये स्यातामित्याशंक्याह—

ॐ आपदः संपदः काले दैवादेवेति निश्चयी ।
तृप्तः स्वस्थेंद्रियो नित्यं न वांछति न शोचति३

२८२] काले आपदः संपदः दैवात् एव इति निश्चयी
तृप्तः नित्यं स्वस्थेंद्रियः न वांछति न शोचति ॥

२८३) काले समयविशेषे । आपदः संपदः च । दैवात् प्राक्तनादृष्टादेवेश्वरपरिपाचितात् एव इति निश्चयी अत एव तृप्तो वीततृष्णः । अत एव नित्यं स्वस्थेंद्रियो विषयानाक्रुष्टेंद्रिय अप्राप्तं न वांछति । नष्टं न शोचति इत्यर्थः॥३॥

२८४ ननूक्तनिश्चयवानपि कर्माणि कुर्वन्नेव दृश्यत इत्याशंक्याह—

ॐ सुखदुःखे जन्ममृत्यू दैवादेवेति निश्चयी ।
साध्यादर्शी निरायासः कुर्वन्नपि न लिप्यते ४

२८५] सुखदुःखे जन्ममृत्यू दैवात् एव इति निश्चयी
साध्यादर्शी निरायासः कुर्वन् अपि न लिप्यते ॥

२८६) सुखदुःखे जन्ममृत्यू । दैवात् अदृष्टात् एव इति निश्चयी । अत एव इष्टं तथा इष्टं फलं साध्यमिति अदर्शी । अत एव निरायासः प्रयत्नरहितः । अहङ्कराभावात् कुर्वन्नपि न लिप्यते कर्मजन्यफलभागी न भवति कर्तृत्वाभिमानरहितत्वादित्यर्थः ॥ ४ ॥

०००००००००००००००००००००००००००००००

२८७ ननु कुर्वन्कथं निरायास इत्याशङ्क्याह—
चिन्तया जायते दुःखं नान्यथेहेति निश्चयी ।
तया हीनः सुखी शान्तः सर्वत्र गलितस्पृहः ॥५॥

२८८] इह दुःखं चिन्तया जायते न अन्यथा इति निश्चयी तया हीनः शान्तः सर्वत्र गलितस्पृहः सुखी ॥

२८९) इह दुःखं चिन्तया जायते । नान्यथेति निश्चयी । अत एव च तया चिन्तया हीनः । अत एव शान्तः स्थिरान्तःकरणः । अत एव सर्वत्र सुखदुःखसाधनयोः । गलितस्पृहः अतः सुखी भवतीत्यर्थः ॥ ५ ॥

३९० उक्तसाधनैः सिद्धज्ञानिनां निजदशा निरूपयति—

३९१
नाहं देहो न मे देहो बोधोऽहमिति निश्चयी ।
कैवल्यमिव संप्राप्तो न स्मरत्यकृतं कृतम् ॥ ६॥

३९१] अहं देहः न मे देहः न बोधः अहं इति निश्चयी कैवल्यं इव संप्राप्तः कृतं अकृतं न स्मरति ॥

३९२) अहं देहो न । तथा मे देहो न । किं तु नित्यबोधोहमिति ज्ञानवशाद्देहादौ निवृत्ताहंममाभिमानः । देहादीनां कृतं अकृतं च । मया कृतमिति न स्मरति ॥ यथा कैवल्यं विदेहकैवल्यं प्राप्य कृताकृतं न स्मरति । तद्वदित्यर्थः ॥ ६ ॥

३९३
आब्रह्मस्तंबपर्यंतमहमेवेति निश्चयी ।
निर्विकल्पः शुचिः शांतः प्राप्ताप्राप्तविनिर्वृतः ७

३९३] आब्रह्मस्तंबपर्यंतं अहं एव इति निश्चयी
निर्विकल्पः शुचिः शांतः प्राप्ताप्राप्तविनिर्वृतः ॥

३९४) ब्रह्माणं हिरण्यगर्भमारभ्य तृण-स्तंब-पर्यंतं सर्वं जगत् अहमेवेति प्रत्यक्षनिश्चयवान् पुरुषः । निर्विकल्पः संकल्पविकल्पशून्यः । अत एव शुचिः विषयासंगरूपमलरहितः । अत एव शांतो निश्चलांतःकरणः । अत एव प्राप्ताप्राप्तयोरपि विषययोर्निर्वृतः परमसंतोषवान् आत्मानंदपूर्णत्वादित्यर्थः ॥ ७ ॥

३९५ नन्वात्मज्ञानी कथं निर्विकल्पादिरूप इत्याशंक्याह—

**[३९६] नानाश्चर्यमिदं विश्वं न किंचिदिति निश्चयी ।**
**निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति८**

३९६] नानाश्चर्यं इदं विश्वं न किंचित् इति निश्चयी निर्वासनः स्फूर्तिमात्रः न किंचित् इव शाम्यति ॥

३९७) अधिष्ठानतत्त्वसाक्षात्कारेणाध्यस्तबाधे सति । नानाश्चर्यं इदं विश्वं जगत् । न किंचित् पृथक् सत्ताशून्यं । इति निश्चयी पुरुषः । निवृत्तवासनः केवलचिद्रूपः सन् । न किंचिदिव विशेषव्यवहारागोचर एव । शाम्यति निवृत्तकार्यकारणोपाधिर्भवति । तत्त्वज्ञानेन सर्वस्यापि स्वप्नवन्निवृत्तेरित्यर्थः ॥ ८ ॥

इति श्रीमद्विश्वे० ज्ञानाष्टकं नामैकादशं प्रकरणं समाप्तम् ॥ ११ ॥

## ॥ अथ एवमेवाष्टकं नाम द्वादशं प्रकरणं प्रारभ्यते ॥ १२ ॥

गुरुणोदीरितं ज्ञानं न किंचिदिव शाम्यति ।
तत्स्वस्मिन्नप्यभिख्यातुं शिष्यो वदति सांप्रतम् ॥१॥

२९८ उक्तं ज्ञानाष्टकेन "न किंचिदिव शाम्यति" इति । तदेव शिष्यः । स्वस्मिन्विशदयतुमेवमेवाष्टकमाह । तत्र प्रथमं कायवाङ्मनसां व्यापारोपरममाह—

३९९
कायकृत्यासहः पूर्वं ततो वाग्विस्तरासहः ।
अथ चिंतासहस्तस्मादेवमेवाहमास्थितः ॥ १ ॥

३९९] पूर्वं कायकृत्यासहः ततः वाग्विस्तरासहः अथ चिंतासहः एवम् एव तस्मात् अहं आस्थितः ॥

४००) अहं पूर्वं अपि कायिकरूपकर्मासहः । ततो हेतोः वाग्विस्तरासहः जपकर्मासहः । अथ अतो मनोव्यापाररूपा या चिंता तत्र असहस्तस्माद् हेतोः । एवमेव निर्व्यापार एव अहमास्थितः आसमस्म्येव स्थित इत्यर्थः ॥१॥

४०१ उक्तव्यापारत्रयोपरमहेतुं वदन्नेवोक्तमनुवदति—

**प्रीत्यभावेन शब्दादेरदृश्यत्वेन चात्मनः ।**
**विक्षेपैकाग्रहृदय एवमेवाहमास्थितः ॥ २ ॥**

४०२] शब्दादेः प्रीत्यभावेन आत्मनः च अदृश्यत्वेन विक्षेपैकाग्रहृदयः एवम् एव अहं आस्थितः ॥

४०३) क्षयिष्णुफलजनकस्य शब्दादेः शब्दकायकर्मद्वयस्य । प्रीत्यभावेन प्रीत्यविषयत्वेन । आत्मनः च अदृश्यत्वेन । त्रिविधविक्षेपेभ्यो व्यावृत्तं एकाग्रं हृदयं यस्य स विक्षेपैकाग्रहृदय इति मध्यमपदलोपी समासः । क्षयिष्णुफलजनकस्य जपादेः प्रीत्यविषयत्वाज्जपादिरूपो विक्षेपो न ममास्ति । आत्मनश्चादृश्यत्वाद्ध्यानाद्यविषयत्वाच्चितारूपोऽपि विक्षेपो मम नास्तीत्यर्थः । अत एवमेव स्वस्वरूपेणैव । अहमास्थितः ॥ २ ॥

४०४ ननु तथापि समाध्यर्थं व्यवहारः कर्त्तव्य इत्याशंक्य । नेत्याह—

समाध्यासादिविक्षिप्तौ व्यवहारः समाधये ।
एवं विलोक्य नियममेवमेवाहमास्थितः ॥ ३ ॥

२०५] समाध्यासादिविक्षिप्तौ व्यवहारः समाधये एवं नियमं विलोक्य एवं एव अहं आस्थितः ॥

२०६) कर्तृत्वभोक्तृत्वाद्यनर्थाध्यासादिभिः विक्षिप्तौ सत्यां तन्निरासार्थं । समाधये व्यवहारो नान्यथेति नियमं विलोक्य । शुद्धात्मज्ञानेन तदध्यासाभावादेव । समाधिशून्य एवाहमास्थित इत्यर्थः ॥ ३ ॥

oooooooooooooooooooooooooooooo

२०७
हेयोपादेयविरहादेवं हर्षविषादयोः ॥
अभावादद्य हे ब्रह्मन्नेवमेवाहमास्थितः ॥ ४ ॥

२०७] हेयोपादेयविरहात् एवं हर्षविषादयोः अभावात् हे ब्रह्मन् अद्य एवम् एव अहं आस्थितः ॥

४०८) पूर्णात्मदर्शिनो मम हेयोपादेयवस्तुनो विरहात् । अत एवं अमुना प्रकारेण । हर्षविषादयोः अपि अभावात् । हे ब्रह्मन् गुरो । अद्य अधुना । अहमेवमेवास्थित इत्यर्थः ॥ ४ ॥

०००००००००००००००००००००००००००००००

आश्रमानाश्रमं ध्यानं चित्तस्वीकृतवर्जनम् ॥
विकल्पं मम वीक्ष्यैतैरेवमेवाहमास्थितः ॥५॥

४०९] आश्रमानाश्रमं ध्यानं चित्तस्वीकृतवर्जनं मम विकल्पं वीक्ष्य एतैः एवम् एव अहं आस्थितः ॥

४१०) आश्रमानाश्रमं । ध्यानं च । तथा तत्प्रयुक्तं चित्तस्वीकृतवर्जनं च । एतैस्त्रिभिरेव मम । विकल्पं संकल्पविकल्पं वीक्ष्य । अहमेवमेव एतत्रयरहित एव । आस्थितः ॥ ५ ॥

०००००००००००००००००००००००००००००००

कर्मानुष्ठानमज्ञानाद्यथैवोपरमस्तथा ॥
बुद्ध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः ॥६॥

४११] यथा एव कर्मानुष्ठानं अज्ञानात् तथा उप-रमः इदं सम्यक् बुद्धा वयं एवम् एव अहं आस्थितः ॥

४१२) यथैव कर्मानुष्ठानमज्ञानात् । त-थैवोपरमः कर्मोपरमोऽप्यज्ञानादेव । इदं । स-म्यक् यथार्थतो । बुद्धा एवं कर्मतदुपरमरहित एव अहमास्थितः ॥ ६ ॥

०००००००००००००००००००००००००००००००

४१३

अचिंत्यं चिंत्यमानोऽपि चिंतारूपं भजत्यसौ॥
त्यक्त्वा तद्भावनं तस्मादेवमेवाहमास्थितः॥७॥

४१३] अचिन्त्यं चिन्त्यमानः अपि असौ चिन्तारूपं भजति तस्मात् तत् भावनं त्यक्त्वा एवम् एव अहं आस्थितः ॥

४१४) अचिंत्यं ब्रह्मेति चिंत्यमानोऽपि असौ । आत्मचिंतालक्षणं रूपं भजति ॥ तस्मात् हेतोः । तद्भावनं अचिंत्यं ब्रह्मेति भावनं । त्यक्त्वा अहमेवमेव भावनारहित एव । आस्थितः ॥ ७ ॥

४१५ एवमेवेत्यवस्थायाः साधकोऽपि श्रेष्ठः। किं पुनस्तत्स्वभाव इति कैमुतिकन्यायेनाह—

एवमेव कृतं येन स कृतार्थो भवेदसौ ॥
एवमेव स्वभावो यः स कृतार्थो भवेदसौ॥८॥

४१६] येन एवम् एव कृतं सः असौ कृतार्थः भवेत् यः एवम् एव स्वभावः सः असौ कृतार्थः भवेत् ॥

४१७) येन एवमेव सर्वक्रियारहितमेव स्वरूपं। साधनवशात् कृतं। सोऽसौ कृतार्थो भवेत्॥ यः तु एवमेव स्वभाववान् सोऽसौ कृतार्थो भवतीति किं वक्तव्यमित्यर्थः॥ ८॥

इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायामेवमेवाष्टकं नाम द्वादशं प्रकरणं समाप्तम् ॥ १२ ॥

## ॥ अथ यथासुखसप्तकं नाम त्रयोदशं प्रकरणं प्रारभ्यते ॥ १३ ॥

एवमेवेत्यवस्थायाः फलीभूतां सुखस्थितिम् ॥
आह शिष्यः स्फुटीकर्तुमहमासे यथा सुखम् ॥ १ ॥

४१८ अथ "एवमेव" इत्यवस्थायाः फलीभूतां सुखावस्थां स्वकीयां विशदयितुमाह—

४१९

**अकिंचनभवं स्वास्थ्यं कौपीनत्वेऽपि दुर्लभम् ॥**
**त्यागादाने विहायास्मादहमासे यथा सुखम् ॥ १**

४१९] अकिंचनभवं स्वास्थ्यं कौपीनत्वे अपि दुर्लभं अस्मात् त्यागादाने विहाय यथासुखं अहं आसे ॥

४२०) अकिंचनभवं सर्वसंगाभावप्रभवं । स्वास्थ्यं चित्तस्थैर्यं । कौपीनत्वेऽपि कौपीनासक्तावपि । दुर्लभं । अस्मात् कारणात् । अहं त्यागादाने विहाय त्यागादानयोरासक्तिं विहाय। यथासुखं सुखमनतिक्रम्य अहमासे । न कदाचित् दुःखीत्यर्थः ॥ १ ॥

४२१
कुत्रापि खेदः कायस्य जिह्वा कुत्रापि खिद्यते॥
मनः कुत्रापि तत्त्यक्त्वा पुरुषार्थे स्थितः सुखम्

४२१] कुत्र अपि कायस्य खेदः कुत्र अपि जिह्वा खिद्यते कुत्र अपि मनः तत् त्यक्त्वा सुखं पुरुषार्थे स्थितः ॥

४२२) कुत्रापि शरीरकर्मणि । कायस्य खेदः । कुत्रापि वाचिककर्मणि । जिह्वा खिद्यते ॥ कुत्रापि ध्यानादिकर्मणि । मनः खिद्यते ॥ अतोऽहांतत्रयं अपि त्यक्त्वा । सुखं यथा स्यात्तथा । पुरुषार्थे स्वात्मन्येव । स्थितः २

oooooooooooooooooooooooooooooooo

४२३ ननु कायवाङ्मनोव्यापारत्यागे । देह एव सद्यः पतेद्भोजनांबुपानादेरपि त्यागादित्याशंक्याह—

४२४
कृतं किमपि नैव स्यादिति संचिंत्य तत्वतः॥
यदा यत्कर्त्तुमायाति तत्कृत्वासे यथासुखम् ३

४२४] कृतं किं अपि तत्वतः न एव स्यात् इति संचिंत्य

यदा यत् कर्त्तुं आयाति तत् कृत्वा यथासुखं आसे ॥

४२५) शरीरेंद्रियादिभिः कृतं किमपि तत्वतः आत्मकृतं । न स्यादिति संचिंत्य । यदा यत् शरीरादिकर्म । कर्तुमायाति । तत् अहंकार-शून्यत्वेन कृत्वा । अहं यथासुखं आसे ॥ ३ ॥

oooooooooooooooooooooooooooooo

४२६ ननु कर्म वा नैष्कर्म्यं वा एकत्र निष्ठावश्यं स्वीकार्या । पुरुषार्थार्थिनेत्याशंक्याह—

४२७
कर्मनैष्कर्म्यनिर्बंधभावा देहस्थयोगिनः ॥
संयोगायोगविरहादहमासे यथासुखम् ॥ ४ ॥

४२७] कर्मनैष्कर्म्यनिर्बंधभावाः देहस्थयोगिनः अहं संयोगायोगविरहात् यथासुखं आसे ॥

४२८) कर्मनैष्कर्म्यनिर्बंध-रूपा-भावा स्वभावा । देहस्थयोगिनः देहासक्तयोगिन एव ॥ अहं तु देहसंयोगासंयोगविरहादपि यथासुखं आसे । तथा च मम देहाद्यासंगाभावान्न कर्मनैष्कर्म्य-निर्बंध इत्यर्थः ॥ ४ ॥

४२९ अथ लौकिकव्यापारेऽपि मम निर्बंध इत्याह—

४३० अर्थानर्थौ न मे स्थित्या गत्या न शयनेन वा
तिष्ठन् गच्छन् स्वपन् तस्मादहमासे यथासुखम्

४३०] मे स्थित्या गत्या अर्थानर्थौ न। वा शयनेन न। तस्मात् तिष्ठन् गच्छन् स्वपन् अहं यथासुखं आसे ॥

४३१) मम स्थित्यादिना साध्यौ अर्थानर्थौ न स्तः। पूर्णानंदात्मदर्शित्वात् ॥ तस्मात् अनासक्त्या। तिष्ठन् गच्छन् स्वपन् वा। अहं। यथासुखं आसे ॥ ५ ॥

---

४३२ एतदेव भंग्यंतरेणाह—

४३३ स्वपतो नास्ति मे हानिः सिद्धिर्यत्नवतो न वा
नाशोल्लासौ विहायास्मादहमासे यथासुखम् ६

४३३] स्वपतः मे हानिः न अस्ति। यत्नवतः वा सिद्धिः न। अस्मात् नाशोल्लासौ विहाय अहं यथासुखं आसे ॥

२३४) स्वपतो यत्नरहितस्य । मे मम । हानिः नास्ति ॥ यत्नवतः च वा मम । सिद्धिः फलविशेषप्राप्तिः नास्ति ॥ अस्मात् कारणाद्यत्नायत्नयोः नाशोल्लासौ विहायाहं यथासुखमासे ॥ ६ ॥

सुखादिरूपानियमं भावेष्वालोक्य भूरिशः ॥
शुभाशुभे विहायास्मादहमासे यथासुखम् ॥ ७

२३५] भावेषु सुखादिरूपानियमं भूरिशः आलोक्य शुभाशुभे विहाय अस्मात् अहं यथासुखं आसे ॥

२३६) भावेषु अवतारेषु सुखादिरूपानियमं सुखदुःखादिधर्माणामनित्यत्वं । भूरिशः बहुषु स्थलेषु । आलोक्य । तस्मात्सुखाद्यनित्यत्वदर्शनाद्धेतोः । अहं यथासुखमासे ॥ ७ ॥

॥ इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायां यथासुखसप्तकं नाम त्रयोदशं प्रकरणं समाप्तम् ॥ १३ ॥

# ॥ अथ शांतिचतुष्टयं नाम चतुर्दशं प्रकरणं प्रारभ्यते ॥ १४ ॥

उदीरतां सुखावस्थां समर्थयितुमात्मनि ॥
प्राह शिष्यः समावस्थां चतुःश्लोक्या गुरुं प्रति॥१॥

४३७ पूर्वं तु गुरुणोपशमाष्टकमुक्तं । संप्रति तु शिष्यः स्वसुखावस्थासमर्थनार्थमात्मनः शमावस्थामाह—

प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः ॥
निद्रितो वोधित इव क्षीणसंसरणो हि सः॥१॥

४३८] यः प्रकृत्या शून्यचित्तः प्रमादात् भावभावनः निद्रितः बोधितः इव सः हि क्षीणसंसरणः ॥

४३९) प्रकृत्या स्वभावेन । विषयेषु शून्यचित्तः । प्रमादात् बुद्धिपूर्वकमारब्धवशाद्भावान् विषयान् भावयति चिंतयतीति भावभावनः ।

क इव निद्रितो बोधित इव । स यथा निद्रावशाच्छून्यचित्तः केनचित् बोधितत्वात्समादाद्भावभावन्न एवंविधो यः पुमान् विषयेषु शांतचित्तः । सः हि निश्चितं क्षीणसंसरणः संसारहेतुविषयानुस्मरणाभावादित्यर्थः ॥ १ ॥

ooooooooooooooooo0ooooooooooooooo

४४०

क धनानि क मित्राणि क मे विषयदस्यवः ॥
क शास्त्रं क च विज्ञानं यदा मे गलिता स्पृहा॥२॥

४४०] मे यदा स्पृहा गलिता मे क धनानि क मित्राणि क विषयदस्यवः क शास्त्रं च क विज्ञानं ॥

४४१) विषयभावनाशून्यस्य पूर्णात्मदर्शिनो मे । यदा स्पृहा विषयेच्छा गलिता । तदा मे मम । क धनानि । क विषय-रूपा दस्यवः चौराः क । शास्त्रं च क । विज्ञानं अहं ब्रह्मासीति निदिध्यासनं च क । धनादिविज्ञानात्तेष्वपि ममास्था नास्तीत्यर्थः ॥ २ ॥

४४२
विज्ञाते साक्षिपुरुपे परमात्मनि चेश्वरे ॥
नैराश्ये वंधमोक्षे च न चिंता मुक्तये मम॥३॥

४४२] साक्षिपुरुपे परमात्मनि ईश्वरे विज्ञाते च वंधमोक्षे नैराश्ये च मम मुक्तये चिंता न ॥

४४३) देहेंद्रियादीनां साक्षिपुरुपे त्वंपदार्थे । परमात्मनि चेश्वरे तत्पदार्थे । विज्ञाते ब्रह्माहमस्मीति साक्षात्कृते सति । नित्यनिर्मुक्तचिद्रूपात्मतानुभावात् वंधमोक्षे अपि नैराश्ये सति । मम मुक्त्यर्थं न चिंता ॥ ३ ॥

oooooooooooooooooooooooooooooooo

४४४ नुनु प्रमादाद्भावभावकः कथं शांत इत्याशंक्याह—

४४५
अंतर्विकल्पशून्यस्य वहिः स्वच्छंदचारिणः ॥
भ्रांतस्येव दशास्तास्तास्तादृशा एव जानते॥४

४४५] अंतर्विकल्पशून्यस्य बहिः भ्रांतस्य इव स्वच्छंदचारिणः ताः ताः दशाः तादृशाः एव जानते ॥

४४६) अंतःकरणे विकल्पशून्यस्य । बहिः भ्रांतस्येव स्वच्छंदचारिणः ज्ञानिनो । दशा-स्तादृशा एव ज्ञानिन एव । जानते ॥ ४ ॥

॥ इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायां शिष्यप्रोक्तं शांतिचतुष्टयं नाम चतुर्दशं प्रकरणं समाप्तम् १४

## ॥ अथ तत्त्वोपदेशविंशतिकं नाम पंचदशं प्रकरणं प्रारभ्यते ॥ १५ ॥

दुर्लक्ष्यमात्मनस्तत्त्वं प्रत्यापयितुमंजसा ॥
शुश्रुस्तत्त्वोपदेशार्थं गुरुराह दयोदधिः ॥ १ ॥

४४७ यद्यपि प्रथममात्मतत्त्वोपदेश कृत एव। तथापि तदात्मतत्वमंतेवासिभ्यः पुनः पुनरुपदेष्टव्यं दुर्लक्ष्यत्वात्। यथा छांदोग्योपनिषदि नवकृत्वः श्वेतकेतुं प्रत्याचारशिक्षार्थमसकृदात्मोपदेशं गुरुराह। तत्रादौ ज्ञानाधिकारिणमनधिकारिणं चाह—

**यथा तथोपदेशेन कृतार्थः सत्वबुद्धिमान् ॥**
**आजीवमपि जिज्ञासुः परस्तत्र विमुह्यति ॥१॥**

४४८] सत्वबुद्धिमान् यथा तथा उपदेशेन कृतार्थः परः आजीवं जिज्ञासुः अपि तत्र विमुह्यति ॥

४४९) सत्वबुद्धिमान् शिष्यो। यथा तथा आपाततोऽपि उपदेशेन कृतार्थः स्यात्। अत एव। कृतयुगे प्रणवमात्रोपदेशादपि शिष्याः कृतार्थाः बभूवुः। परः असत्वबुद्धिः। यावज्जीवं जिज्ञासुः अपि। बहुधोपदिष्टोऽपि विमुह्यति। यथा विरोचनो ब्रह्मणा बहुधोपदिष्टोऽपि सुमोहेत्यर्थः ॥ १ ॥

४५० अथ वंधमोक्षौ सुखोपायेन संग्रहेण निरूपयति—

४५१
**मोक्षो विषयवैरस्यं वंधो वैषयिको रसः ॥**
**एतावदेव विज्ञानं यथेच्छसि तथा कुरु ॥२॥**

४५१] विषयवैरस्यं एव मोक्षः वैषयिकः रसः वंधः एतावत् विज्ञानं यथा इच्छसि तथा कुरु ॥

४५२) विषयेष्वनुरागाभाव एव मोक्षः। विषयेष्वनुरागस्तु वंध इत्यर्थः। एवं तावदेव वंधमोक्षयोः विशिष्टं उत्कृष्टं ज्ञानं। एवं ज्ञात्वा च त्वं। यथेच्छसि तथा कुरु ॥ २ ॥

oooooooooooooooooooooooooooooooo

४५३ इदं तु विषयवैरस्यं तत्त्वबोधसाध्यमित्याह—

४५४
**वाग्मिप्राज्ञमहोद्योगं जनं मूकजडालसम् ॥**
**करोति तत्त्ववोधोऽयमतस्त्यक्तो वुभुक्षुभिः ३**

४५४] अयं तत्त्ववोधः वाग्मिप्राज्ञमहोद्योगं जनं मूकजडालसं करोति अतः त्यक्तः वुभुक्षुभिः ॥

४५५) अयं प्रसिद्धः। आत्मतत्त्ववोधः। वाग्मिनं

जनं बहुचतुरवाक्यभाषिणं । मूकं करोति॥प्राज्ञं नानाविशेषवेदिनं जनं जडं करोति ॥ महोद्योगं नानाक्रियानुष्ठानशालिनं । अलसं निष्क्रियं करोति ॥ मनसः प्रत्यक्प्रवणतया वागादयः कुंठिता भवंति । ज्ञानी तद्रहितो भवतीत्यर्थः ॥ यतो यं तत्त्वबोधः वागादीन् कुंठितान्करोति । अतो भोगेच्छुभिः त्यक्तः अनादृत इत्यर्थः ॥३॥

०००००००००००००००००००००००००००००००००

४५६ तत्त्वबोधसिध्द्यर्थमुपदिशति—

४५७
**न त्वं देहो न ते देहो भोक्ता कर्त्ता न वा भवान्**
**चिद्रूपोऽसि सदा साक्षी निरपेक्षः सुखं चर॥४**

४५७] त्वं देहः न । चिद्रूपः असि । न ते देहः । न वा भवान् कर्त्ता भोक्ता । सदा साक्षी निरपेक्षः सुखं चर ॥

४५८) त्वं देहादिरूपो न भवसि। यतः चिद्रूपोऽसि । न ते तव देहसंबंधः । "असंगो ह्ययं पुरुषः" इति श्रुतेः । न वा भवान् कर्त्ता भोक्ता । यतः कर्तृभोक्तृप्रभृतीनां सदा साक्षी ।

यो यत्साक्षी स तद्भिन्नः । यथा घटसाक्षी घटाद्भिन्न इत्यर्थः । अतस्त्वं देहतत्संबंधिषु अनपेक्षः सन् । सुखं चर इत्यर्थः ॥ ४ ॥

ooooooooooooooooooooooooooooooooooooo

४५९ निरपेक्षत्वमुपपादयितुमाह—

४६० रागद्वेषौ मनोधर्मौ न मनस्ते कदाचन ॥

४६३ निर्विकल्पोऽसि बोधात्मा निर्विकारः सुखं चर

४६०] रागद्वेषौ मनोधर्मौ न मनः कदाचन ते ॥

४६१) रागद्वेषौ तु मनोधर्मौ न तु तव धर्मौ । मनः तु कदाचिदपि तव संबंधि न भवति । अतस्तदध्यासाद्रागाद्यध्यासं मा कुर्वित्यर्थः॥

४६२ ननु रागद्वेषौ ममैव धर्मौ । कथं नेत्याशंक्याह—

४६३] निर्विकल्पः बोधात्मा असि निर्विकारः सुखं चर॥

४६४) यतस्त्वं निर्विकल्पः बोधात्मा च असि । अतो रागादिविकाररहितः सन् । सुखं चर इत्यर्थः ॥ ५ ॥

४६४
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥
विज्ञाय निरहंकारो निर्ममस्त्वं सुखी भव॥६॥

४६५] सर्वभूतेषु च आत्मानं विज्ञाय सर्वभूतानि च आत्मनि निरहंकारः निर्ममः त्वं सुखी भव ॥

४६६) सर्वभूतेषु कारणत्वेनानुस्यूतं आत्मानं विज्ञाय विभाव्य । सर्वभूतानि चात्मनि अध्यस्तानीति विभाव्य । अहंकारादेः सर्वस्यात्मत्वेनैव स्फुरणादहंममाभिमानरहितः त्वं सुखी भव ॥ ६ ॥

०००००००००००००००००००००००००००००००

४६७ सर्वभूतानि चात्मनीत्येतद्विशदयति—

४६८
विश्वं स्फुरति यत्रेदं तरंगा इव सागरे ॥
तत्त्वमेव न संदेहश्चिन्मूर्ते विज्वरो भव ॥ ७ ॥

४६८] यत्र इदं विश्वं सागरे तरंगाः इव स्फुरति । तत् त्वं एव । न संदेहः । चिन्मूर्ते विज्वरः भव ॥

४६९) यत्रेदं विश्वं । सागरे तरंगा इव
ना[illegible]नं तत् चैतन्यं । त्वमेव । अतः

कारणात् हे चिन्मूर्ते। त्वं विज्वरो भव चिन्मात्रोऽहमित्यनुभवान्निवृत्तसर्वसंतापो भवेत्यर्थः ॥७॥

ooooooooooooooooooooooooooooooo

४७० परमकारुणिकतया पुनः पुनर्बोधयति—

श्रद्धत्स्व तात श्रद्धत्स्व नात्र मोहं कुरुष्व भोः॥
ज्ञानस्वरूपो भगवानात्मा त्वं प्रकृतेः परः॥८॥

४७१] तात श्रद्धत्स्व श्रद्धत्स्व। भोः अत्र मोहं न कुरुष्व ॥

४७२) श्रद्धत्स्व तात श्रद्धत्स्व । अत्र चिद्रूपतायामसंभावनाविपरीतभावनारूपं मोहं मौढ्यमविवेकं मा कुरुष्व मा कार्षीरित्यर्थः ॥

४७३ मा कुरुष्व अत्रेत्युक्तं विशदयति—

४७४] ज्ञानस्वरूपः प्रकृतेः परः त्वं भगवान् आत्मा ॥

४७५) ज्ञानस्वरूपः प्रकृतेः परस्त्वं। कीदृशस्त्वं। भगवान् तत्पदार्थः। तथा आत्मा त्वं पदार्थः ॥ ८ ॥

४७६
गुणैः संवेष्टितो देहस्तिष्ठत्यायाति याति च ॥
आत्मा न गंता नागंता किमेनमनुशोचसि ॥९॥

४७६] गुणैः संवेष्टितः देहः तिष्ठति आयाति याति च । आत्मा न गंता न आगंता । एनं किं अनुशोचसि॥

४७७) गुणैः इंद्रियादिभिः । संवेष्टितो देहः । इह लोके तिष्ठति । तथा किंचित्कालं आयाति तथा किंचित्कालं याति च गच्छति । देहादिभिन्न आत्मा तु न गंता । न अपि आ-गंता । अतोऽहं गंताऽहं मरिष्यामीत्येवं एनं किं शोचसि । देहधर्मैरात्मानं मा शुचेत्यर्थः ॥ ९ ॥

४७८ नापि देहस्थित्युत्क्रांतिभ्यां तव वृद्धि-हानिरित्याह—

४७९
देहस्तिष्ठतु कल्पांतं गच्छत्वद्यैव वा पुनः ॥
क्व वृद्धिः क्व च वा हानिस्तव चिन्मात्ररूपिणः१०

४७९] देहः कल्पांतं तिष्ठतु वा पुनः अद्य एव गच्छतु।

चिन्मात्ररूपिणः तव क्व वृद्धिः क्व च वा हानिः ॥

४८०) नित्य-चिन्मात्ररूपिणः तव देह-स्थित्या न वृद्धिः । न वा देहनिवृत्त्या हानिः इत्यर्थः ॥ १० ॥

०००००००००००००००००००००००००००००००००००

त्वय्यनंतमहांभोधौ विश्ववीचिः स्वभावतः ॥
उदेतु वास्तमायातु न ते वृद्धिर्न वा क्षतिः॥११॥

४८१] विश्ववीचिः स्वभावतः त्वयि अनंतमहांभोधौ उदेतु वा अस्तं आयातु । ते वृद्धिः न । वा क्षतिः न ॥

४८२) विश्वाख्या वीचिः अपि स्वभावतः अविद्याज्ञानरूपतः । त्वयि अनंतचित्समुद्रे । उदेतु अथ वा अस्तमायातु एतावताऽपि । ते तव । न वृद्धिः न वा क्षतिः । परमानंदत्वा-दित्यर्थः ॥ ११ ॥

४८३ तात चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत्॥
अतः कस्य कथं कुत्र हेयोपादेयकल्पना॥१२॥

४८३] तात चिन्मात्ररूपः असि । इदं जगत् ते भिन्नं न । अतः कस्य कथं कुत्र हेयोपादेयकल्पना ॥

४८४) सर्वस्य त्वदभिन्नत्वात् किं हेयमुपादेयं कथं केन वा प्रकारेण हेयमुपादेयं । कुत्र वा हेयमुपादेयमित्यर्थः ॥ १२ ॥

---

४८५ एकस्मिन्नव्यये शांते चिदाकाशेऽमले त्वयि ॥
कुतो जन्म कुतः कर्म कुतोऽहंकार एव च॥१३॥

४८५] एकस्मिन् अव्यये शांते चिदाकाशे अमले त्वयि जन्म कुतः च कर्म कुतः अहंकारः कुतः एव ॥

४८६) एकस्मिन् सजातीयविजातीयस्वगत-भेदशून्ये । अव्यये विनाशरहिते । शांते कार्य-

शून्ये । चिदाकाशे निर्मले च सर्वोपाधिशून्ये च । त्वयि । कुतो जन्म । कुतः च कर्म । कुतश्चाहंकारः । द्वितीयस्य हेतोरभावात् । अव्ययस्य जन्मासंभवात् । कार्यशून्यस्य च कर्मकर्तृत्वासंभवान्निर्मलस्य चाहंकारासंभवादित्यर्थः ॥ १३ ॥

०००००००००००००००००००००००००००००००

४८७ एकत्वमुपपादयति—

४८८
यत्त्वं पश्यसि तत्रैकस्त्वमेव प्रतिभाससे ॥
किं पृथक् भासते स्वर्णात्कटकांगदनूपुरम् १४

४८८] यत् त्वं पश्यसि तत्र एकः त्वं एव प्रतिभाससे । कटकांगदनूपुरं किं स्वर्णात् पृथक् भासते ॥

४८९) यत् यत् कार्यं त्वं पश्यसि तत्र कारणरूपः त्वमेव एकः प्रतिभाससे । कटकांगदादौ स्वर्णवदित्यर्थः ॥ १४ ॥

४९०
अयं सोऽहमयं नाहं विभागमिति संत्यज ॥
सर्वमात्मेति निश्चित्य निःसंकल्पः सुखी भव १५

४९०] अयं सः अहं अयं अहं न इति विभागं संत्यज। सर्वं आत्मा इति निश्चित्य निःसंकल्पः सुखी भव॥

४९१) "कारणरूप आत्मा एव सर्वं" इति निश्चित्य। भेदभ्रमं संत्यज। तथा च निर्विकल्पो विगतनानाप्रतिभासः सन् सुखी भव द्वितीयप्रतिभानाद्धि दुःखं भवतीत्यर्थः ॥ १५ ॥

००००००००००००००००००००००००००००००

४९२ विभागत्यागे युक्तिमाह—

४९३
तवैवाज्ञानतो विश्वं त्वमेकः परमार्थतः ॥
त्वत्तोऽन्यो नास्ति संसारी नासंसारी च कश्चन

४९३] तव एव अज्ञानतः विश्वं। परमार्थतः त्वं एकः। त्वत्तः अन्यः कश्चन संसारी न च असंसारी न अस्ति ॥

४९४) तवैवाज्ञानतो विश्वं विश्वाकारविक्षेपः। अतः परमार्थतः त्वमेकः। अतः संसारी असंसारी च त्वत्तो न अन्यः कश्चिदित्यर्थः १६

४९५
भ्रांतिमात्रमिदं विश्वं न किंचिदिति निश्चयी॥
निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति

४९५] इदं विश्वं भ्रांतिमात्रं किंचित् न इति निश्चयी निर्वासनः स्फूर्तिमात्रः किंचित् न इव शाम्यति ॥

४९६) इदं विश्वं भ्रांतिमात्रसिद्धं । अतो हेतोः न किंचित् पृथक्सत्तारहितमित्यर्थः । इति निश्चयी । अत एव सर्वस्य निरस्तत्वात् निर्वासनो वासनारहितः । स्फूर्तिमात्रः सन् न किंचिदिव निरस्ताशेषविशेषः सन् शाम्यति॥ १७

४९७
एक एव भवांभोधावासीदस्ति भविष्यति ॥
न ते बंधोऽस्ति मोक्षो वा कृतकृत्यः सुखं चर१८

४९७] भवांभोधौ एकः एव आसीत् अस्ति भविष्यति ते बंधः अस्ति न वा मोक्षः कृतकृत्यः सुखं चर॥

४९८) कालत्रयेऽपि भवांभोधौ एकः त्वं एव । अतस्तव बंधमोक्षौ न स्तः । अतस्त्वं कृतकृत्यः सन् सुखं चर ॥ १८ ॥

४९९
मा संकल्पविकल्पाभ्यां चित्तं क्षोभय चिन्मय॥
उपशाम्य सुखं तिष्ठ स्वात्मन्यानंदविग्रहे॥१९॥

४९९] चिन्मय संकल्पविकल्पाभ्यां चित्तं मा क्षोभय उपशाम्य स्वात्मनि आनंदविग्रहे सुखं तिष्ठ ॥

५००) हे चिन्मय । त्वं संकल्पविकल्पाभ्यां चित्तं मा क्षोभय । उपशाम्य उपरतसंकल्पविकल्पो भव । आनंदरूपे स्वात्मनि सुखं तिष्ठ ॥ १९ ॥

०००००००००००००००००००००००००००००००००

५०१ ध्यानमपि त्यजेत्याह—

५०२ ५०५
त्यजैव ध्यानं सर्वत्र मा किंचिद्धृदि धारय ॥
आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि॥

५०२] सर्वत्र ध्यानं त्यज एव ॥

५०३) सर्वत्र ध्यानं त्यज कुत्रापि ध्यानं मा कार्षीरित्यर्थः ॥

५०४ एतदेव विशदयति—

५०५] किंचित् हृदि धारय ना ॥

५०६ मननमपि त्यजेत्याह—

५०७] आत्मा त्वं मुक्तः एव असि विमृश्य किं करिष्यसि ॥

५०८) आत्मा त्वं सदा मुक्त एवासि । अतो विमृश्य विचार्य । किं फलं करिष्यसि नित्यमुक्तत्वादित्यर्थः ॥ २० ॥

इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायां तत्त्वोपदेशविंशतिकं नाम पञ्चदशं प्रकरणं समाप्तम् ॥ १५ ॥

## ॥ अथ विशेषोपदेशकं नाम षोडशं प्रकरणं प्रारभ्यते ॥ १६ ॥

पृथक्सत्वेन सर्वस्य विस्मृतिर्मुक्तिसाधनम् ॥
तृष्णाद्यनर्थविच्छेदद्वारेणेत्यत्र वर्ण्यते ॥ १ ॥

५०९ तत्त्वज्ञानेनं सर्वप्रपंचस्य पृथक्सत्तया विस्मरणकारणैस्तव तृष्णापायादिद्वारा मुक्तिर्नान्यथेति विशेषमुपदिशति—

**आचक्ष्व शृणु वा तात नानाशास्त्राण्यनेकशः॥**
**तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते॥१॥**

५१०] तात नानाशास्त्राणि अनेकशः आचक्ष्व वा शृणु। तथा अपि तव सर्वविस्मरणात् ऋते स्वास्थ्यं न॥

५११) हे तात त्वं नानाशास्त्राणि। अनेकशः अनेकवारं। शिष्येभ्यः आचक्ष्व गुरुभ्यः शृणु वा। तथापि तव सर्वविस्मरणादृते स्वास्थ्यं श्रेयो। नास्तीत्यर्थः॥ ननु सुषुप्तौ सर्वविस्मरणं सर्वेषां विद्यत एव। तेन सर्वेषां मोक्षः स्यादिति व्यर्थं सर्वविस्मरणमिति चेत्॥ सत्यं। सुषुप्तौ तु यद्यपि विषयविस्मरणमस्ति।

तथापि अज्ञानविस्मरणं नास्तीति सर्वविस्मरणा-भावात् । जीवन्मुक्तस्य तु अज्ञानादेः सर्वस्याध्य-स्तानानुसंधानरूपं विस्मरणमस्तीति भावः ॥ १ ॥

ooooooooooooooooooooooooooooooooo

५१२ सर्वविस्मरणे सति सर्वस्वरूपं वीक्ष्य चित्तं निरस्तसर्वाशं भवतीति सूचयन्नाह—

५१३
भोगं कर्म समाधिं वा कुरु विज्ञ तथापि ते ॥
चित्तं निरस्तसर्वाशमत्यर्थं रोचयिष्यति॥ २ ॥

५१३] विज्ञ भोगं वा कर्म समाधिं कुरु । तथा अपि ते चित्तं निरस्तसर्वाशं अत्यर्थं रोचयिष्यति ॥

५१४) हे विज्ञ त्वं भोगं कुरु कर्म वा कुरु समाधिं वा कुरु । तथापि चित्तमत्यर्थं रोचयिष्यति स्वरूपे रुचिमुत्पादयिष्यति । कीदृशं चित्तं । निरस्तसर्वाशं सर्वविस्मरणे सति सर्वाशानुदयादित्यर्थः ॥ २ ॥

५१५ सर्वतृष्णाविलये सति तु कृतेनापि कर्मणा दुःखहेतुरायासो न भवतीति सूचयन्नाह—

५१६ आयासात्सकलो दुःखी नैनं जानाति कश्चन ॥
५१८ अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृतिम् ॥३॥

५१६] सकलः आयासात् दुःखी कश्चन एनं जानाति न ॥

५१७) सकलो जनः आयासात् एव दुःखी भवति । परंतु कश्चन एनं आयासं । न जानाति दुःखहेतुरयमिति न वेत्ति ॥

५१८] अनेन एव उपदेशेन धन्यः निर्वृतिं प्राप्नोति॥

५१९) आयासात्सकलो दुःखीति अनेनैवोपदेशेन धन्यः सुकृती । निर्वृतिं परमसुखं । प्राप्नोति ॥ ३ ॥

---

५२० व्यापारानासक्तिः सुखहेतुरित्याह—

५२१ व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि ॥
तस्यालस्यधुरीणस्य सुखं नान्यस्य कस्यचित् ४

५२१] यः निमेषोन्मेषयोः अपि व्यापारे खिद्यते तस्य आलस्यधुरीणस्य तु सुखं न अन्यस्य कस्यचित् ॥

५२२) यो निमेषोन्मेषयोरपि व्यापारे खिद्यते अनासक्तो भवति । तस्यालस्यधुरीणस्य क्रियाभिनिवेशरहितस्य । सुखं । नान्यस्य क्रियाभिनिवेशयुक्तस्य ॥ ४ ॥

ooooooooooooooooooooooooooooooooooooo

५२३ सर्वतृष्णाविलये सति द्वंद्वहानिरपि भवतीति सूचयन्नाह—

५२४
इदं कृतमिदं नेति द्वंद्वैर्मुक्तं यदा मनः ॥
धर्मार्थकाममोक्षेषु निरपेक्षं तदा भवेत् ॥ ५ ॥

५२४] इदं कृतं इदं न इति द्वंद्वैः मुक्तं यदा मनः तदा धर्मार्थकाममोक्षेषु निरपेक्षं भवेत् ॥

५२५) इदं कृतमिदं न इति-आदि द्वंद्वैः मुक्तं यदा मनो भवति । तदा पुरुषार्थचतुष्टयेऽपि निरपेक्षं भवेत् । द्वंद्वातीतस्य जीवन्मुक्तत्वादित्यर्थः ॥ ५ ॥

५२६ पुरुषार्थकामनानिरपेक्षस्तु विरक्तकामुकाभ्यां विलक्षण इत्याह—

५२७
**विरक्तो विषयद्वेष्टा रागी विषयलोलुपः ॥**
**ग्रहमोक्षविहीनस्तु न विरक्तो न रागवान्॥६॥**

५२७] विषयद्वेष्टा विरक्तः विषयलोलुपः रागी ग्रहमोक्षविहीनः तु विरक्तः न रागवान् न ॥

५२८) मुमुक्षुः सन् यो विषयद्वेष्टा स विरक्तः कथ्यते । कामनासापेक्षः सन् यो विषयलोलुपः स रागी इति कथ्यते । यस्तु ग्रहमोक्षविहीनः ग्रहमोक्षेच्छाभ्यां विहीनः । स विरक्तसुरक्ताभ्यां विलक्षणः सर्वतो निरपेक्षतया हानोपादानेच्छारहितत्वादित्यर्थः ॥ ६ ॥

---

५२९ ननु ज्ञानिनोऽपि हानोपादानादिव्यवहारो दृश्यते इत्यत्राह—

५३०
**हेयोपादेयता तावत्संसारविटपांकुरः ॥**
**स्पृहा जीवति यावद्वै निर्विचारदशास्पदम्॥७॥**

५३०] निर्विचारदशास्पदं स्पृहा यावत् जीवति तावत् हेयोपादेयता संसारविटपांकुरः वै ॥

५३१) निर्विचारदशास्पदं अविवेकदशास्पदीभूता । स्पृहा तृष्णा । यावत् जीवति । तावत् पर्यंतमेव हेयोपादेयता हेयोपादानादिव्यवहारः । संसार-वृक्षस्य शाखा-अंकुरो भवति। ज्ञानिनां तु स्पृहाभावे सत्यपि हानोपादानादिव्यवहारे संसारशाखाप्रसरो न भवतीत्यर्थः ॥ ७ ॥

ooooooooooooooooooooooooooooooooooo

५३२ प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि ॥
निर्द्वंद्वो बालवद्धीमानेवमेव व्यवस्थितः ॥८॥

५३२] प्रवृत्तौ रागः निवृत्तौ द्वेषः एव हि जायते धीमान् बालवत् निर्द्वंद्वः एवम् एव व्यवस्थितः ॥

५३२) प्रवृत्तौ सरागप्रवृत्तौ सत्यामुत्तरोत्तरं विषयेषु रागो जायते । विषयेऽपि द्वेषपूर्वक-निवृत्तौ सत्यामुत्तरोत्तरं विषयेषु द्वेष एव हि जायते । अतो धीमान् ज्ञानी । बालवत् शुभाशु-

भानुसंधानरहितः । निर्द्वंद्वः रागद्वेषविहीनः सन् एव । रागजनितप्रवृत्तिद्वेषजनिवृत्तिरहित एव स्थितः । केवलं प्रारब्धवशादेव कदाचित्प्रवर्त्तते कदाचिन्निवर्त्तते च । न तु रागद्वेषवशादित्यर्थः॥८

५३४
**हातुमिच्छति संसारं रागी दुःखजिहासया ॥**
**वीतरागो नि हिर्दुःखस्तस्मिन्नपि न खिद्यति॥९**

५३४] रागी दुःखजिहासया संसारं हातुम् इच्छति । वीतरागः निर्दुःखः तस्मिन् अपि न खिद्यति हि ॥

५३५) यस्तु रागी स दुःखजिहासया संसारं हातुमिच्छति । वीतरागः तु निर्दुःखः रागोत्थदुःखरहितत्वात्तस्मिन् संसारे सति अपि न खिद्यति खेदं न प्राप्नोति ॥ ९ ॥

---

५३६
**यस्याभिमानो मोक्षेऽपि देहेऽपि ममता तथा ॥**
**न च ज्ञानी न वा योगी केवलं दुःखभागसौ१०**

५३६] यस्य मोक्षे अपि अभिमानः तथा च देहे अपि ममता न योगी न वा ज्ञानी केवलं असौ दुःखभाक् ॥

५३७) अहं ज्ञानी त्रिकालवृत्तांतदर्शी मुक्त इत्येवं यस्य मोक्षेऽपि अभिमानो नासौ ज्ञानी । तथा च । अहं योगाभ्यासी देहस्यैव गुणकर्मधर्मरतः । मम देहो वहारोपवासादिसमर्थ इत्येवं देहेऽपि अभिमानो न असौ योगी । न वा ज्ञानी । केवलं असौ दुःखभाक् दुःखहेत्वहंममाभिमानानिवृत्तेरित्यर्थः ॥ १० ॥

ooooooooooooooooooooooooooooooo

५३८ सर्वविस्मरणोपदेशमुपसंहरति—

५३९
हरो यद्युपदेष्टा ते हरिः कमलजोऽपि वा ॥
तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते॥११

५३९] ते यदि हरः उपदेष्टा वा हरिः कमलजः अपि तथा अपि तव सर्वविस्मरणात् ऋते स्वास्थ्यं न ॥

५४०) स्पष्टम् ॥ ११ ॥

इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायां विशेषोपदेशकं नाम षोडशं प्रकरणं समाप्तम् ॥ १६ ॥

## ॥ अथ तत्त्वज्ञस्वरूपविंशतिकं नाम सप्तदशं प्रकरणं प्रारभ्यते ॥१७॥

अथातः श्लोकविंशत्या तत्त्वज्ञस्य दशोच्यते ॥
विद्यातज्ज्ञप्रकर्षस्य व्यक्तये गुरुणा स्फुटम् ॥ १ ॥

५४१ अथान्येषामपि विद्यायां प्रवृत्त्यर्थे तत्त्वज्ञानफलं व्याख्यातुमिच्छया तत्त्वज्ञदशां गुरुर्निरूपयति—

५४२
तेन ज्ञानफलं प्राप्तं योगाभ्यासफलं तथा ॥
तृप्तः स्वच्छेंद्रियो नित्यमेकाकी रमते तु यः॥१॥

५४२] तेन ज्ञानफलं प्राप्तं तथा योगाभ्यासफलं यः तृप्तः स्वच्छेंद्रियः एकाकी नित्यं तु रमते ॥

५४३) तेन एव ज्ञानफलं प्राप्तं । य आत्मन्येव तृप्तो न भोगादिना । अत एव स्वच्छेंद्रियो विषयानासक्तेंद्रियः सन् एकाकी विषयसंयोगं विनैव । नित्यं आत्मन्येव रमते ॥ १ ॥

५४४
न कदाचिज्जगत्यस्मिन् तत्त्वज्ञो हंत खिद्यति ।
यत एकेन तेनेदं पूर्णं ब्रह्मांडमंडलम् ॥ २ ॥

५४४] हंत अस्मिन् जगति कदाचित् तत्त्वज्ञः न खिद्यति यतः एकेन तेन इदं ब्रह्मांडमंडलं पूर्णम् ॥

५४५ हंत इति सहर्षसंबोधने । हे शिष्य । अस्मिन् जगति कदाचित् अपि तत्त्वज्ञो न खिद्यते । यत एकेन एव तेनेदं ब्रह्मांडमंडलं पूर्णं व्याप्तम् । अतो द्वितीयस्याभावान्न खिद्यतीत्यर्थः ॥२॥

५४६
न जातु विषयाः केऽपि स्वारामं हर्षयंत्यमी ।
सल्लकीपल्लवप्रीतमिवेभं निंबपल्लवाः ॥ ३ ॥

५४६] स्वारामं जातु अमी विषयाः के अपि हर्षयंति न सल्लकीपल्लवप्रीतं इव इभं निंबपल्लवाः ॥

५४७) स्वस्मिन्नात्मन्येव आरमते तं स्वारामं। जातु कदाचित् अमी विषयाः न हर्षयंति तुच्छत्वात् पृथक्सत्तामप्राप्यैव रमते तं स्वारामं जातु कदाचिदमी विषया न हर्षयंति इंद्रिय-

रहितत्वात् । यथा सल्लकीपल्लवप्रीतं । इभं गजं । निंवपल्लवा न हर्षयंति कटुकत्वादित्यर्थः ॥ ३ ॥

oooooooooooooooooooooooooooooooo

यस्तु भोगेषु भुक्तेषु न भवत्यधिवासिता ।
अभुक्तेषु निराकांक्षी तादृशो भवदुर्लभः॥४॥

५४८] यः तु भुक्तेषु भोगेषु अधिवासिता न भवति अभुक्तेषु निराकांक्षी तादृशः भवदुर्लभः ॥

५४९) यस्य तु भुक्तेषु भोगेषु आसक्तिर्न भवति । अभुक्तेषु आकांक्षा न भवति आत्मतृप्तत्वात् । तादृशो भवदुर्लभः संसारसागरे कोटिष्वेक इत्यर्थः ॥ ४ ॥

oooooooooooooooooooooooooooooooo

बुभुक्षुरिह संसारे मुमुक्षुरपि दृश्यते ।
भोगमोक्षनिराकांक्षी विरलो हि महाशयः॥५॥

५५०] इह संसारे बुभुक्षुः मुमुक्षुः अपि दृश्यते भोगमोक्षनिराकांक्षी महाशयः विरलः हि ॥

१) संसारे बुभुक्षुर्मुमुक्षुः चानेकधा

दृश्यते । भोगमोक्षनिराकांक्षी महति पूर्णे ब्रह्मणि आशयोऽन्तःकरणं यस्य स महाशयो विरलः । " यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः " इति भगवद्वचनात् ॥ ५ ॥

५५२

धर्मार्थकाममोक्षेषु जीविते मरणे तथा ।
कस्याप्युदारचित्तस्य हेयोपादेयता न हि ॥६॥

५५२] धर्मार्थकाममोक्षेपु जीविते तथा मरणे कस्य अपि उदारचित्तस्य हेयोपादेयता न हि

५५३) पुरुषार्थचतुष्टये । तथा जीवितमरणयोर्यथायोग्यं हेयोपादेयतारहितो विरल इत्यर्थः॥६॥

५५४

वांछा न विश्वविलये न द्वेषस्तस्य च स्थिता।
यथा जीविकया तस्माद्धन्य आस्ते यथासुखम्७

५५४] विश्वविलये वांछा न तस्य स्थितौ च द्वेषः न । तस्मात् धन्यः यथा जीविकया यथासुखं आस्ते ॥

५५५) यस्मात् ज्ञानिनो विश्वविलये प्रपंचोप-

रमे । वांछा न अस्ति । तस्य प्रपंचस्य स्थितौ च द्वेषः न अस्ति । अधिष्ठानत्वेनैव ब्रह्मरूपात्मस्फुरणात् । तस्मात् कारणात् । धन्यो यो विद्वानारब्धवशात् प्राप्तया यथा प्राप्तया । जीविकया सुखं अनतिक्रम्यैव आस्ते । इत्यर्थः ॥ ७ ॥

ooooooooooooooooooooooooooooooo

५५६ कृतार्थोऽनेन ज्ञानेनेत्येवं गलितधीः कृती ॥
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथासुखं

५५६] अनेन ज्ञानेन कृतार्थः इति एवं गलितधीः कृती पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् यथासुखं आस्ते ॥

५५७) अहं अनेन अद्वैतात्मज्ञानेन । कृतार्थः इत्येवं गलितधीः कृती भक्षणादिकं कुर्वन्नपि । सुखं अनतिक्रम्य आस्ते। कृतार्थत्वधियः सत्वाद्बहिरिंद्रियव्यापारे सत्यपि अज्ञानिन इव विरक्तस्य तस्य खेदो न भवति । "उपविष्टो व्रजन् तिष्ठन् तन्मयः स्यात्समाहित"इति-वचनात् । न भवतीत्यर्थः॥८॥

शून्या दृष्टिर्वृथा चेष्टा विकलानींद्रियाणि च ।
न स्पृहा न विरक्तिर्वा क्षीणसंसारसागरे॥९॥

५५८] क्षीणसंसारसागरे स्पृहा न वा विरक्तिः न । दृष्टिः शून्या चेष्टा वृथा इंद्रियाणि विकलानि च ॥

५५९) क्षीणः संसारसागरो यस्य सः तस्मिन् क्षीणसंसारसागरे पुरुषे। स्पृहा विषयेच्छापि । न । विरक्तिः च न ॥ अतः तस्य मनःकायेंद्रियव्यापारो बालोन्मत्तादिवदित्याह ॥ शून्येति ॥ तस्य दृष्टिर्मनोव्यापारः शून्या संकल्पविकल्परहितः। चेष्टा कायव्यापारः । वृथा फलमनुद्दिश्यैव। तस्य इंद्रियाणि विकलानि पुरःस्थितानामपि विषयाणामनिर्णायकत्वात् । तदुक्तं भगवद्गीतायां " यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" इति ॥ ९ ॥

५६० ५६३
न जागर्ति न निद्राति नोन्मीलति न मीलति।
५६६
अहो परदशा कापि वर्त्तते मुक्तचेतसः ॥१०॥

५६०] न जागर्ति न निद्राति ॥

५६१) ज्ञानी न जागर्ति जाग्रदवस्थावान्न भवति ॥

५६२ अत्र बहिर्विषयाननुसंधानादिति हेतुमाह—

५६३] न उन्मीलति न मीलति ॥

५६४) बाह्यविषयान्नानुसंधत्ते इत्यर्थः । तथा ज्ञानी न निद्राति यतः न निमीलति जडोन्मत्तवत् । सर्वान् विषयान् ब्रह्मत्वेन पश्यतीत्यर्थः॥

५६५ का तर्हि तस्य दशेत्यत आह—

५६६] अहो मुक्तचेतसः क्व अपि परदशा वर्त्तते ॥

५६७) अहो इति आश्चर्ये । मुक्तचेतसः क्वापि अलौकिकी परदशा उत्कृष्टावस्था । 'तुरीयातीतेत्यर्थः ॥ १० ॥

५६८ इदमेव विशदयति—

५६९
सर्वत्र दृश्यते स्वस्थः सर्वत्र विमलाशयः ।
समस्तवासनामुक्तो मुक्तः सर्वत्र राजते॥११॥

५६९] सर्वत्र स्वस्थः सर्वत्र विमलाशयः दृश्यते समस्तवासनामुक्तः मुक्तः सर्वत्र राजते ॥

५७०) सर्वत्र सुखे दुःखे च । स्वस्थः स्वस्थचित्तः । तथा सर्वत्र एव शत्रौ मित्रे च । विमलाशयः समानदर्शी । यतः समस्त-विषय-वासनाभ्यो मुक्तः । अत एव मुक्तः सर्वत्र सर्वासु दशासु । राजते दीप्यते पूर्णात्मदर्शित्वात् ॥ ११ ॥

५७१
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्गृह्णन्वदन्व्रजन्
ईहितानीहितैर्मुक्तो मुक्त एव महाशयः॥१२॥

५७१] पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गृह्णन् वदन् व्रजन् ईहितानीहितैः मुक्तः महाशयः मुक्तः एव ॥

५७२) प्रारब्धवशाद्दर्शनादिकं वहिरिंद्रियव्यापारं कुर्वन्नपि ईहितानीहितैः इच्छाद्वेषैः । मुक्तो

महाशयो महति आत्मनि आशयो यस्य स महाशयः । मुक्त एव मनोविकारातीतत्वात्॥१२॥

५७३ इदमेव विशदयति—

५७४
न निंदति न च स्तौति न हृष्यति न कुप्यति ।
न ददाति न गृह्णाति मुक्तः सर्वत्र नीरसः१३

५७४] निंदति न स्तौति न हृष्यति न कुप्यति न ददाति न गृह्णाति न च सर्वत्र नीरसः मुक्तः ॥

५७५) स्पष्टं । न स्तौति । न हर्षं प्राप्नोति । न केषु कोपं करोतीत्यर्थः । कस्मैचित् न गृह्णाति । सर्वत्र नीरसः मुक्त इत्यर्थः ॥१३॥

५७६ किंच—

५७७
सानुरागां स्त्रियं दृष्ट्वा मृत्युं वा समुपस्थितम् ।
अविह्वलमनाः स्वस्थो मुक्त एव महाशयः॥१४

५७७] सानुरागां स्त्रियं दृष्ट्वा वा समुपस्थितं मृत्युं अविह्वलमनाः स्वस्थः महाशयः मुक्तः एव ॥

५७८) सानुरागां स्त्रियं दृष्ट्वा अथ वा समुपस्थितं मृत्युं दृष्ट्वा अविह्वलमनाः कामभयाभ्यां विमुक्तमनाः । महाशयो मुक्त एव ॥१४॥

५७९ किंच—

५८०
सुखे दुःखे नरे नार्यां संपत्सु च विपत्सु च॥
विशेषो नैव धीरस्य सर्वत्र समदर्शिनः॥१५॥

५८०] सुखे दुःखे नरे नार्यां च संपत्सु च विपत्सु सर्वत्र विशेषः धीरस्य समदर्शिनः न एव ॥

५८१) स्पष्टम् ॥ १५ ॥

५८२
न हिंसा नैव कारुण्यं नौद्धत्यं न च दीनता।
नाश्चर्यं नैव च क्षोभः क्षीणसंसरणेऽनरे॥१६॥

५८२] क्षीणसंसरणे अनरे हिंसा न कारुण्यं न एव औद्धत्यं न दीनता न आश्चर्यं न क्षोभः न एव ॥

५८३) क्षीणसंसरणे अनरे नराभिमानरहिते विदुषि । हिंसा नाम परद्रोह इत्यादयो मनोविकारा न भवंतीत्यर्थः ॥ १६ ॥

५८४
न मुक्तो विषयद्वेष्टा न वा विषयलोलुपः ।
असंसक्तमना नित्यं प्राप्तप्राप्तमुपाश्नुते ॥१७॥

५८४] मुक्तः विषयद्वेष्टा न । वा विषयलोलुपः न । असंसक्तमनाः नित्यं प्राप्तप्राप्तं उपाश्नुते ॥

५८५) जीवन्मुक्तः विषयद्वेष्टा अपि न । न वा विषयलोलुपः । किं तर्हि । असंसक्तमनाः सन् प्रारब्धवशात् प्राप्तप्राप्तमुपाश्नुते भुंक्ते इत्यर्थः ॥ १७ ॥

५८६
समाधानासमाधानहिताहितविकल्पनाः ।
शून्यचित्तो न जानाति कैवल्यमिव संस्थितः ॥

५८६] शून्यचित्तः समाधानासमाधानहिताहितवि-कल्पनाः न जानाति कैवल्यं इव संस्थितः ॥

५८७) वहिः शून्यचित्तो ज्ञानी । समाधानादिविविधाः कल्पना न जानाति । उत्प्रेक्षते । विदेहकैवल्यं प्राप्त इव ॥ १८ ॥

ooooooooooooooooooooooooooooooooo

५८८

**निर्ममो निरहंकारो न किंचिदिति निश्चितः । अंतर्गलितसर्वाशः कुर्वन्नपि करोति न ॥१९॥**

५८८] निर्ममः निरहंकारः किंचित् न इति निश्चित अंतर्गलितसर्वाशः कुर्वन् अपि न करोति ॥

५८९) अहंममाभिमानशून्यतयाधिष्ठान रिक्तं " किंचित् न सत् " इति [illegible] अत एव । अंतर्गलितसर्वाशः । अत कुर्वन्नपि न करोति । कर्तृत्वा[illegible] नर इत्यर्थः ॥ १९ ॥

मनःप्रकाशसंमोहस्वप्नजाड्यविवर्जितः ।
दशां कामपि संप्राप्तो भवेद्गलितमानसः ॥२०॥

५९०] गलितमानसः कां दशां अपि संप्राप्तः भवेत् मनःप्रकाशसंमोहस्वप्नजाड्यविवर्जितः ॥

५९१) गलितं सविशेषवृत्तिविहीनं मानसं यस्य स ज्ञानी । कामपि अनिर्वाच्यां । दशां । संप्राप्तो भवेत् ॥ तदेव दर्शयति मनःप्रकाश-विवर्जितः॥ सविशेषप्रकाशाभावात् । तथा संमोह-वर्जितः प्रत्यक् प्रवणचित्तत्वात् । अत एव स्वप्न-वर्जितः जाड्येन सुषुप्त्या च । विवर्जित इत्यर्थः ॥२०॥

॥ इति श्रीमद्विश्वेश्वरविरचितटीकासहिताष्टावक्रगीतायां तत्त्वज्ञस्वरूपविंशतिकं नाम सप्तदशकं प्रकरणं समाप्तम् ॥१७॥

## ॥ अथ शांतिशतकं नाम ॥
## अष्टादशं प्रकरणं प्रारभ्यते ॥ १८ ॥

तत्त्वाभिज्ञे फलीभूतसमस्तैव प्रधानताम् ।
व्याख्यातुं वर्ण्यते शांतिः शतश्लोकैः पुनः स्फुटम् ॥

५९२ तत्र तावच्छांतेः प्रधानतेति ख्यापयितुं । फलीभूतां शांतिं वर्णयितुकामः शांतिशालिनं नमस्करोति—

**यस्य बोधोदये तावत्स्वप्नवद्भवति भ्रमः ॥**
**तस्मै सुखैकरूपाय नमः शांताय तेजसे ॥१॥**

५९३] बोधोदये तावत् भ्रमः स्वप्नवत् यस्य भवति तस्मै शांताय सुखैकरूपाय तेजसे नमः ॥

५९४) बोधोदये सति । तावत् तत्क्षणमेव । प्रपंच-भ्रमः । स्वप्नवत् तुच्छो । यस्य ज्ञातो भवति । तस्मै शांताय निवृत्तसंकल्पविकल्पाय । अत एव सुखैकरूपाय दुःखाननुविद्धसुखस्वभावाय । अत एव तेजसे स्वप्रकाशाय । विदुषे नमः ॥ १ ॥

५९५ ननु धनिनोऽपि सुखिनो दृश्यंते । तत्कथं शांतसंकल्प एव सुखैकरूप इत्याशंक्याह—

५९६

**अर्जयित्वाखिलानर्थान् भोगानाप्नोति पुष्कलान् ।**
**न हि सर्वपरित्यागमंतरेण सुखी भवेत् ॥ २ ॥**

५९६] अखिलान् अर्थान् अर्जयित्वा पुष्कलान् भोगान् आप्नोति सर्वपरित्यागं अंतरेण सुखी भवेत् न हि ॥

५९७) अखिलानर्थान् धनधान्यकांतादीन् । अर्जयित्वा । पुष्कलान् बहुविधान् भोगान् एव आप्नोति । न तु सुखैकरूपः स्यात् तत्क्षये दुःखभागित्वात् । सर्वपरित्यागमंतरेण सर्वसंकल्पविकल्पत्यागं विना । सुखैकरूपो न हि भवति । नैव स्यात् ॥ २ ॥

५९८ संकल्पविकल्पयोस्तुच्छत्वज्ञानमेव त्यागमात्रस्य तथात्वात । यथा वंध्यापत्रे तच्छत्वज्ञान-

मेव त्यागः असतः त्यागासंभवात् । इदमेव रूपकालंकारेण विशदयति—

५१९
कर्त्तव्यदुःखमार्तंडज्वालादग्धांतरात्मनः ।
कुतः प्रशमपीयूषधारासारमृते सुखम् ॥ ३ ॥

५९९] कर्त्तव्यदुःखमार्तंडज्वालादग्धांतरात्मनः प्रशमपीयूषधारासारं ऋते सुखं कुतः ॥

६००) कर्त्तव्यानि यानि कर्माणि। तज्जनितानि दुःखान्येव मार्तंडज्वाला खरतरसूर्यतापस्तेन दग्धः अंतरात्मा मनो यस्य तस्य संकल्पविकल्पप्रशमामृतधारालक्षणमासारं विना सुखं कुतः स्यात् ॥ ३ ॥

६०१ संकल्पविकल्पप्रशमस्यामृतत्वं संसाररूपविषनिवर्त्तकत्वादित्याशयेनाह—

६०२
भवोऽयं भावनामात्रो न किंचित्परमार्थतः ।
६०५
नास्त्यभावःस्वभावानां भावाभावविभाविनां४

६०२] अयं भवः भावनामात्रः परमार्थतः किंचित् न ॥

६०३) अयं भवः भावनामात्रः संकल्पमात्रप्रभवः। परमार्थतः आत्मव्यतिरिक्तं किंचित् न अस्ति। परमार्थतस्तु आत्मैव भावरूपः। न तु अभावरूपः ॥

६०४ नन्वभावरूपोऽपि प्रपंचः कालादिवशाद्भावस्वभाव इत्याशंक्याह—

६०५] भावाभावविभाविनां स्वभावानां अभावः न अस्ति ॥

६०६) भावाभावेषु विभाविनां स्थितानां। स्वभावानां अभावो नास्ति। नहि उष्णस्वभावो वह्निः कदाचिदपि शीतलस्वभावो दृष्टः। तथा च मनोराज्यवद्भावनामात्रसिद्धः सत्स्वभावः प्रपंचो भावनानिवृत्तौ निवर्त्तेत इति संकल्पप्रशमसंसारविषतापापगमादात्मामृतप्राप्तिहेतुत्वादमृतमिति भावः ॥ ४ ॥

६०७ ननु संकल्पोपशमनमात्रेण कथमात्मानन्दप्राप्तिरित्याशंक्य । तस्य नित्यप्राप्तत्वमाह—

६०८

न दूरं न च संकोचाल्लब्धमेवात्मनः पदम् ।
निर्विकल्पं निरायासं निर्विकारं निरंजनम् ५

६०८] आत्मनः पदं दूरं न । संकोचात् च न । लब्धं एव निरायासं निर्विकल्पं निर्विकारं निरंजनं ॥

६०९) आत्मनः पदं स्वरूपं । दूरं न अस्ति । न अपि संकोचात् वर्तते परिच्छिन्नं नास्ति । परिपूर्णत्वात् ॥ अत एवात्मनः पदं नित्यलब्धं प्राप्तमेवास्ति । संकल्पवशात् पुनरप्राप्तमिवानिह्नुतो मन्यते । कंठगतचामीकरवत् ॥ कीदृशं पदं । निर्विकल्पं विकल्पातीतं विकल्पानवगम्यं वा । तथा । निरायासं आयासातीतं तदनवगम्यं वा । निर्विकारं विकारातीतं । निरंजनं उपाधिमलशून्यम् ॥ ५ ॥

६१० कथं तर्हि तत्त्वज्ञानेन तत्प्राप्तिव्यवहारः शास्त्रकारणमित्याशंक्य भ्रांतिनाशमात्रादेवेत्याह—

६११ व्यामोहमात्रविरतौ स्वरूपादानमात्रतः ।
वीतशोका विराजंते निरावरणदृष्टयः ॥ ६ ॥

६११] निरावरणदृष्टयः व्यामोहमात्रविरतौ स्वरूपादानमात्रतः वीतशोकाः विराजंते ॥

६१२) ज्ञानेन निरावरणदृष्टयः अविद्यानावृतदृष्टयः । व्यामोहमात्रस्य प्रपंचभ्रांतिमात्रस्य । विरतौ सत्यां । स्वरूपादानमात्रतः आत्मविश्रांतिमात्रतो । वीतशोका विराजंते सर्वदा स्वभावेनैव पूर्णाद्वितीयतया प्रकाशंत इत्यर्थः ॥६॥

६१३ आत्मज्ञानरहस्यमाह—

६१४ समस्तं कल्पनामात्रमात्मा मुक्तः सनातनः ।
इति विज्ञाय धीरो हि किमभ्यस्यति बालवत् ७

६१४] समस्तं कल्पनामात्रं । आत्मा मुक्तः सनातनः । इति विज्ञाय धीरः हि किं अभ्यस्यति बालवत् ॥

६१५) स्पष्टार्थमिदम् ॥ ७ ॥

००००००००००००००००००००००००००००००००

६१६ समस्तकल्पनामात्रमिति ज्ञानस्य निदानभूततत्त्वंपदार्थैक्यज्ञानमाह—

६१७ आत्मा ब्रह्मेति निश्चित्य भावाभावौ च कल्पितौ
निष्कामः किं विजानाति किं ब्रूते च करोति किं ८

६१७] आत्मा ब्रह्म च भावाभावौ कल्पितौ इति निश्चित्य निष्कामः किं विजानाति किं ब्रूते किं च करोति ॥

६१८) आत्मा त्वंपदार्थः। ब्रह्म तत्पदार्थाभिन्न इति निश्चित्य अधिष्ठानसाक्षात्काराच्च भावाभावौ घटादिः तदभावः च कल्पितौ इति निश्चित्य। तथा च सर्वस्य तुच्छत्वानुसंधानात् कामहेत्वविद्याविलयाच्च। निष्कामः सन्। किं विशिष्टतया। जानाति। किं ब्रूते। किं च कार्यं। करोति। कर्तृत्वाभिमानरहितत्वात् ज्ञातापि न वक्तापि न क्रियाकर्तापि नेत्यर्थः ॥८॥

६१९ सर्वमात्मेति ज्ञानं सर्वकल्पनानिवर्तकमित्याह—

६२०

**अयं सोऽहमयं नाहमिति क्षीणा विकल्पनाः।**
**सर्वमात्मेति निश्चित्य तूष्णींभूतस्य योगिनः ९**

६२०] सर्वं आत्मा इति निश्चित्य तूष्णींभूतस्य योगिनः अयं सः अहं अयं अहं न इति विकल्पनाः क्षीणाः ॥

६२१) सर्वमात्मेति निश्चित्य अनुभूय। तूष्णींभूतस्य निवृत्तपराग्व्यापारस्य । योगिनः श्लो० "वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि । एकीकृत्य विमुच्येत मुख्योऽयं योग उच्यते ॥" इति योगलक्षणं — नोक्तं । इति विविधाः कल्पनाः क्षीणा भुक्ताः। इतीति किं । अहं करोमि य एवाहं पूर्वदिने यातमकरवं । सोऽहं यजामि । अयं देवदत्तो गच्छति। नाहं गमिष्यामीत्यादयः कल्पनाः क्षीणा भवंतीत्यर्थः ॥९॥

६३२ निरूपयत्याचार्य उपशांतस्य स्वरूपमाह । उपशां-

न विक्षेपो न चैकाग्र्यं नातिबोधो न मूढता ।
न सुखं न च वा दुःखमुपशांतस्य योगिनः॥ १०

६३३] उपशांतस्य योगिनः विक्षेपः न च एकाग्र्यं न अतिबोधः न मूढता न सुखं न वा दुःखं न च ॥

६३४) उपशांतस्य विकल्परहितस्य योगिनः । विक्षेपो भ्रमता । न । एकाग्र्यादिष्वपि नञर्थः ॥ १०॥

स्वाराज्ये भैक्ष्यवृत्तौ च लाभालाभे जने वने ।
निर्विकल्पस्वभावस्य न विशेषोऽस्ति योगिनः ॥

६३५] स्वाराज्ये भैक्ष्यवृत्तौ लाभालाभे जने वने च विशेषः निर्विकल्पस्वभावस्य योगिनः न अस्ति ॥

६३६) स्वाराज्ये स्वर्गराज्ये । भैक्ष्यवृत्तौ च । प्रारब्धवशाल्लाभे । तदभावे । जने जनसमूहे । वने विजने च । विशेषो योगिनो नास्ति ॥ कीदृशस्य । विकल्परहित-स्वभावस्येत्यर्थः॥ ११॥

६२७
क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकता ।
इदं कृतमिदं नेति द्वंद्वैर्मुक्तस्य योगिनः ॥१२॥

६२७] इदं कृतं इदं न इति द्वंद्वैः मुक्तस्य योगिनः धर्मः क्व वा कामः क्व च अर्थः क्व च विवेकता क्व ॥

६२८) इदं कृतमिदं न कृतमित्यादि द्वंद्वैर्मुक्तस्य योगिनः धर्मार्थकामाः । विवेकता मोक्षोपायभूतो विवेकश्च । न भवति । तन्मूलभूताविद्याकामसंकल्पादीनां विनाशादित्यर्थः॥१२॥

---

६२९ कथं तर्हि जीवन्मुक्तस्य लोके क्रियेत्याशंक्य । जीवनादृष्टवशादेवेत्याह—

६३०
कृत्यं किमपि नैवास्ति न कापि हृदि रंजना ।
यथा जीवनमेवेह जीवन्मुक्तस्य योगिनः॥१३॥

६३०] जीवन्मुक्तस्य योगिनः किं अपि कृत्यं न एव अस्ति । हृदि का अपि रंजना न । यथा जीवनं एव इह॥

६३१) जीवन्मुक्तस्य योगिनः संकल्पवशात् किमपि कृत्यं नैवास्ति । तथा । हृदि मनसि । कापि रंजना कोऽपि अनुरागो न अस्ति । तद्धेतुभूताया विद्याया अभावात् । तथापि अस्य कृत्यं यथा जीवनं जीवनादृष्टमनतिक्रम्य भवतीत्यर्थः ॥ १३ ॥

ooooooooooooooooooooooooooooooooo

६३२

क्व मोहः क्व च वा विश्वं क्व तद्ध्यानं क्व मुक्तता ।
सर्वसंकल्पसीमायां विश्रांतस्य महात्मनः ॥ १४

६३२] सर्वसंकल्पसीमायां विश्रांतस्य महात्मनः मोहः क्व वा विश्वं क्व च तद्ध्यानं क्व मुक्तता क्व ॥

६३३) संकल्पसीमायां आत्मबुद्धौ । विश्रांतस्य । मोहादिकं क्व भवति । किं कारणमाश्रित्य भवति । न किमपि कारणमाश्रित्य भवति। आत्मबुद्ध्या कारणोपमर्दादित्यर्थः ॥ १४ ॥

६३४
येन विश्वमिदं दृष्टं स नास्तीति करोतु वै ।
निर्वासनः किं कुरुते पश्यन्नपि न पश्यति१५

६३४] येन इदं विश्वं दृष्टं सः न अस्ति इति करोतु वै पश्यन् अपि न पश्यति निर्वासनः किं कुरुते ॥

६३५) येन इदं विश्वं घटपटादि । दृष्टं । स तदाहितसंस्कारः । कदाचित् घटादिकं नास्तीति करोतु वै नास्तीति जानातु । यः पश्यन्नपि न पश्यति स निर्वासनः सन् किं कुरुते । यद्विषयकः संस्कारोऽपि नास्ति । तस्य कर्तुमशक्यत्वादित्यर्थः ॥ १५ ॥

६३६
येन दृष्टं परं ब्रह्म सोऽहं ब्रह्मेति चिंतयेत् ।
किं चिंतयति निश्चिंतो द्वितीयं यो न पश्यति१६

६३६] येन परं ब्रह्म दृष्टं सः अहं ब्रह्म इति चिंतयेत् ।-यः द्वितीयं न पश्यति निश्चिंतः किं चिंतयति ॥

६३७) येन परं व्यतिरिक्तं । ब्रह्म दृष्टं ।

न अहं ब्रह्मेति चिंतयेत् । यः तु द्वितीयं न पश्यति । न निश्चितः सर्वचिंतारहितः सन् । किं चिंतयति । न किमपि चिंतयति । अद्विती-यात्मानुभवशालिनि ब्रह्मचिंतनमपि नास्तीत्यर्थः १६

ooooooooooooooooooooooooooooooooooo

६३८ ज्ञानिनश्चित्तनिरोधोऽपि नास्तीत्याह—

६३९
दृष्टो येनात्मविक्षेपो निरोधं कुरुते त्वसौ ।
उदारस्तु न विक्षिप्तः साध्याभावात्करोति किम्

६३९] येन आत्मविक्षेपः दृष्टः असौ तु निरोधं कुरुते । उदारः तु विक्षिप्तः न साध्याभावात् किं करोति ॥

६४०) येन आत्मविक्षेप-चिंतादिभ्रमो दृष्टः। असौ पुरुषः । चित्त-निरोधं कुरुते विक्षेप-परिहारार्थं । उदारः सर्वत्राद्वितीयात्मदर्शी तु विक्षिप्त एव न अस्ति। स विक्षेपपरिहारलक्षणस्य साध्याभावात् । किं कुरुते कथं निरोधं कुरुत इत्यर्थः ॥ १७ ॥

६४१ इदमेव विवृणोति—

६४२ धीरो लोकविपर्यस्तो वर्त्तमानोऽपि लोकवत् ।
न समाधिं न विक्षेपं न लेपं स्वस्य पश्यति१८

६४२] धीरः लोकविपर्यस्तः लोकवत् वर्त्तमानः अपि समाधिं न विक्षेपं न लेपं न स्वस्य पश्यति ॥

६४३) धीरः अद्वितीयात्मविश्रांतः । लोकविपर्यस्तः लोकेषु विक्षेपरहितः प्रारब्धवशात् लोकवद्वर्त्तमानोऽपि बाधितानुवृत्त्या व्यवहारपरोऽपि सन्नयं समाधिः अयं विक्षेपः तथा अयं विक्षेपकृतो लेप आत्मन इत्यादिकं न पश्यति । चिन्मात्रदर्शित्वात् ॥ १८ ॥

ooooooooooooooooooooooooooooooooo

६४४ भावाभावविहीनो यस्तृप्तो निर्वासनो बुधः ।
नैव किंचित्कृतं तेन लोकदृष्ट्या विकुर्वता १९

६४४] यः बुधः तृप्तः भावाभावविहीनः निर्वासनः तेन लोकदृष्ट्या विकुर्वता किंचित् न एव कृतं ॥

६४५) यो बुधस्तृप्तः स्वात्मानुभवतृप्तोऽत

६४९ ननु ज्ञानी चेन्निर्वासनस्तर्हि केन प्रयुक्तः कर्म करोति इत्याशंक्याह—

६५०

**निर्वासनो निरालंबः स्वच्छंदो मुक्तबंधनः ।**
**क्षिप्तः संस्कारवातेन चेष्टते शुष्कपर्णवत्॥२१॥**

६५०] निर्वासनः निरालंबः स्वच्छंदः मुक्तबंधनः संस्कारवातेन क्षिप्तः शुष्कपर्णवत् चेष्टते ॥

६५१) निर्वासनः । अत एव निरालंबः कर्त्तव्यानुसंधानरहितः । अत एव स्वच्छंदः रागद्वेषानधीनः । यतो मुक्तबंधनः बंधहेत्वज्ञान-शून्यः ज्ञानी । संस्कारवातेन क्षिप्तः प्रारब्ध-पवनेन प्रेरितः सन् । शुष्कपर्णवत् विचेष्टते॥२१

०००००००००००००००००००००००००००००००

६५२ संसारसंकल्पादिशून्यस्तु सर्वदा संतुष्ट एवेत्याह—

६५३

**असंसारस्य तु क्वापि न हर्षो न विषादता ।**
**स शीतलमना नित्यं विदेह इव राजते॥२२॥**

६५३] असंसारस्य तु क्व अपि हर्षः न विषादता न नित्यं शीतलमनाः सः विदेहः इव राजते ॥

६५४) न विद्यते संसारस्य हेतुः संकल्पो यस्य तस्य असंसारस्य हर्षादिका ऊर्मयो न जायंते । अत एव ऊर्मिरहितत्वात् नित्यं शीतलमना विदेह-मुक्त इव राजते "षडूर्मि-रहितः शिव" इति स्मृतेः ॥ २२ ॥

ooooooooooooooooooooooooooooooooo

कुत्रापि न जिहासास्ति नाशो वापि न कुत्रचित्
आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः२३

६५५] आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः कुत्र अपि न अस्ति जिहासा नाशः वा अपि कुत्रचित् न॥

६५६) आत्मारामस्य । अत एव धीरस्य निश्चलचित्तस्य । अत एव शीतलः अच्छतरः निर्मलतरः आत्मा मनो यस्य तस्य शीतलाच्छ-तरात्मनः ज्ञानिनः । कुत्रापि जिहासा त्यागेच्छा नास्ति । उपादित्सापि नास्ति । रागद्वेषाभावात् । नाशोऽपि अनर्थोऽपि कुत्रचित् न अस्ति। अन-र्थहेतोरज्ञानस्याभावादित्यर्थः ॥ २३ ॥

६५७
प्रकृत्या शून्यचित्तस्य कुर्वतोऽस्य यदृच्छया ।
प्राकृतस्येव धीरस्य न मानो नावमानता॥२४

६५७] प्रकृत्या शून्यचित्तस्य धीरस्य प्राकृतस्य इव यदृच्छया कुर्वतः अस्य मानः न अवमानता न ॥

६५८) प्रकृत्या स्वभावेन । शून्यं विकाररहितं चित्तं यस्य तस्य धीरस्य आत्मविश्रांतस्य। प्राकृतस्येव अज्ञानिन इव । यदृच्छया प्रारब्धवशात् । कुर्वतोऽस्य विदुषः । स्वमानापमानानुसंधानं नास्तीत्यर्थः ॥ २४ ॥

---

६५९
कृतं देहेन कर्मेदं न मया शुद्धरूपिणा ।
इति चिंतानुरोधी यः कुर्वन्नपि करोति न २५

६५९] देहेन इदं कर्म कृतं शुद्धरूपिणा मया न इति चिंतानुरोधी यः कुर्वन् अपि न करोति ॥

६६०) इति चिंतामनुरोध्यते निरंतरं श्रयति यः स कुर्वन्नपि न करोति । कर्तृत्वाभिमानाभावादित्यर्थः ॥ २५ ॥

६६१ अतद्वादीव कुरुते न भवेदपि बालिशः ।
जीवन्मुक्तः सुखी श्रीमान् संसरन्नपि शोभते२६

६६१] जीवन्मुक्तः अतद्वादी इव कुरुते अपि बालिशः न भवेत् संसरन् अपि सुखी श्रीमान् शोभते ॥

६६२) जीवन्मुक्तः अतद्वादीव अहमिदं करिष्यामीत्यवदन्नेव । कार्यं कुरुते । प्रारब्धवशादवदन् अपि बालिशो मूर्खो । न भवेत् । अंतर्ज्ञानित्वात् । अत एव संसरन्नपि संसारव्यवहारं कुर्वन्नपि अंतः सुखी । अत एव श्रीमान् प्रसन्नतया शोभावान् । अत एव शोभते दीप्यते स्वप्रकाश इत्यर्थः ॥ २६ ॥

---

६६३ नानाविचारसुश्रांतो धीरो विश्रांतिमागतः ।
न कल्पते न जानाति न शृणोति न पश्यति२७

६६३] नानाविचारसुश्रांतः धीरः विश्रांतिम् आगतः न कल्पते न जानाति न शृणोति न पश्यति ॥

६६४) नानाविचारात् द्वैतविचारात् । सुश्रांतः इव निवृत्तो । यतो धीरो ज्ञानी । अत एव आत्मन्येव विश्रांतिमागतः । अत एव न कल्पते । संकल्पादिकं मनोव्यापारं न करोति । न जानाति बुद्धिव्यापारं न करोति । शब्दं न शृणोति । रूपं न पश्यति । इंद्रियमात्रव्यापारं न करोति । कर्तृत्वाभिमानाभावादित्यर्थः ॥ २७ ॥

०००००००००००००००००००००००००००००००००

असमाधेरविक्षेपान्न मुमुक्षुर्न चेतरः[६६५] ।
निश्चित्य[६६८] कल्पितं पश्यन्ब्रह्मैवास्ते महाशयः॥२८

६६५] मुमुक्षुः न असमाधेः इतरः च अविक्षेपात् न॥

६६६) ज्ञानी मुमुक्षुः न भवति । असमाधेः समाधेरकरणात्तथा इतरो बद्धो न भवति । अविक्षेपात् द्वैतभ्रमाभावादित्यर्थः ॥

६६७ कीदृशस्तर्हि ज्ञानीत्याशंक्याह—

६६८] कल्पितं निश्चित्य पश्यन् महाशयः ब्रह्म एव आस्ते॥

६६९) इदं सर्वं कल्पितं इति पूर्वमेव निश्चित्य । पश्चात् बाधितानुवृत्त्या पश्यन् अपि महाशयः निर्विकारचित्तः अत एव ब्रह्मैवास्ते २८

०००००००००००००००००००००००००००००००

६७० ननु संसारं पश्यन्नेव कथं ब्रह्मेत्याशंक्याहंकाराभावादित्याह—

**[६७१] यस्यांतः स्यादहंकारो न करोति करोति सः।**
**निरहंकारधीरेण न किंचिदकृतं कृतम् ॥२९॥**

६७१] यस्य अंतः अहंकारः स्यात् सः न करोति करोति निरहंकारधीरेण अकृतं न किंचित् कृतं ॥

६७२) यस्यांतःकरणे अहंकाराध्यासः स्यात् । सः लोकदृष्टया न कुर्वन्नपि संकल्पादिकं करोति कर्तृत्वाध्यासात् ॥ निरहंकारेण । अत एव धीरेण कर्तृत्वाध्यासरहितेन। यद्यपि लोकदृष्टया अकृतं । तथापि स्वदृष्टया न किंचित् अपि कृतं कर्तृत्वाध्यासाभावादित्यर्थः । "यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते" इति स्मृतेः ॥२९॥

६७३ मुक्तचित्तं वर्णयति द्वाभ्यां—

६७४
नोद्विग्नं न च संतुष्टमकर्तृ स्पंदवर्जितम् ।
निराशं गतसंदेहं चित्तं मुक्तस्य राजते॥३०॥

६७४] मुक्तस्य चित्तं राजते न उद्विग्नं न च संतुष्टं अकर्तृ स्पंदवर्जितं निराशं गतसंदेहं ॥

६७५) मुक्तस्य चित्तं राजते केवलप्रकाशरूपमेव । यतो नोद्विग्नं उद्वेगहेतोर्द्वेषस्याभावात् । न च संतुष्टं संतोषहेतोरनुरागाभावात् । तथा अकर्तृ स्पंदवर्जितं संकल्पविकल्पशून्यमत एव निराशं । गतः संदेहो यस्मात्तत् गतसंदेहं संदेहहेतोरज्ञानस्य नष्टत्वादित्यर्थः ॥ ३० ॥

ooooooooooooooooooooooooooooooooooo

६७६
निर्ध्यातुं चेष्टितुं वापि यच्चित्तं न प्रवर्त्तते ।
निर्निमित्तमिदं किंतु निर्ध्यायति विचेष्टते ३१

६७६] यच्चित्तं चेष्टितुं वा अपि निर्ध्यातुं न प्रवर्त्तते किंतु इदं निर्निमित्तं निर्ध्यायति विचेष्टते ॥

६७७) यस्य ज्ञानिनः चित्तं निर्ध्यातुं

निःक्रियत्वेन स्थातुं। चेष्टितुं चेष्टां संकल्पादिरूपां कर्तुं। वापि। न प्रवर्त्तते न संकल्पयति। किंतु इदं ज्ञानिनश्चित्तं निर्निमित्तं संकल्परहितमेव सत् निध्यायति निश्चलं स्वरूपे तिष्ठति चेष्टति। तथा विचेष्टते विविधां चेष्टां करोतीत्यर्थः॥२१॥

६७८ ज्ञान्यज्ञानिनोर्निर्विशेषं वदन्नेव ज्ञानिनो विरलत्वमाह—

६७९
तत्त्वं यथार्थमाकर्ण्य मंदः प्राप्नोति मूढताम्।
अथवायाति संकोचममूढः कोऽपि मूढवत्॥३२

६७९] मंदः यथार्थं तत्त्वं आकर्ण्य मूढतां प्राप्नोति अथवा संकोचं आयाति कः अपि अमूढः मूढवत्॥

६८०) मंदः अज्ञानी। यथार्थं तत्त्वं तत्त्वंपदार्थाभेदं। श्रुतेः आकर्ण्य असंभावनाविपरीतभावनाभ्यां मूढतां अविवेकं। प्राप्नोति। अथवा शास्त्रार्थसाक्षात्काराय संकोचं चित्तसमाधिं आयाति। कोऽपि सहस्रेष्वेकः अंतः असंमूढोऽपि। बाह्यगत्या मूढवत् बहिर्व्यवहारकर्त्ता भवति॥२॥

६८१ “ अथवायाति संकोचं ” इत्यनेनोक्ता-वेकाग्रतानिरोधौ दूषयति—

**एकाग्रता निरोधो वा मूढैरभ्यस्यते भृशम् ।**
**धीराः कृत्यं न पश्यंति सुप्तवत्स्वपदे स्थिताः३३**

६८२] एकाग्रता वा निरोधः मूढैः भृशं अभ्यस्यते सुप्तवत् स्वपदे स्थिताः धीराः कृत्यं न पश्यंति ॥

६८३) **एकाग्रता** एकमेव अग्रं ध्येयं यस्य तदेकाग्रं । एकाग्रस्य भाव एकाग्रता । वा एकाग्रता एकलक्ष्यनिष्ठचित्तता । अथ-**वा निरोधः** चित्त-विलयो । **मूढैः** अनुत्पन्नात्मसाक्षात्कारैः । विपरीतभावनानिवृत्त्यर्थं **भृशं** अत्यर्थं । **अभ्यस्यते**। **सुप्तवत्** सुपुप्तवत् । देहात्मधीराहित्येन **स्वपदे** स्वरूपे **स्थिता धीरा** विज्ञानिनस्तु । प्रागुक्तं किमपि **कृत्यं न पश्यंति** अद्वैतानंदात्मसाक्षा-त्कारेणैवानानंदादिभ्रमस्य दुरापास्तत्वादित्यर्थः ३३

६८४ निरोधस्याकिंचित्करतामाह—

६८५ अप्रयत्नात्प्रयत्नाद्वा मूढो नाप्नोति निर्वृतिम् ॥
तत्वनिश्चयमात्रेण प्राज्ञो भवति निर्वृतः ॥३४॥

६८५] मूढः अप्रयत्नात् प्रयत्नात् वा निर्वृतिं न आप्नोति प्राज्ञः तत्त्वनिश्चयमात्रेण निर्वृतः भवति ॥

६८६) मूढः पुरुषः मूढो ब्रह्मात्मैकनिश्चयशून्यः । अप्रयत्नात् चित्तनिरोधात् । प्रयत्नात् कर्मानुष्ठानात् वा । निर्वृतिं परमं सुखं । न प्राप्नोति । आनंदहेतोरात्मानंदानुभवाभावादित्यर्थः। प्राज्ञः तु । समाधिं वाक्कर्म वाप्यकुर्वन् । तत्त्वनिश्चयमात्रेण कृतार्थो भवति दुःखहेतोरज्ञानस्य ज्ञानेन दग्धत्वादित्यर्थः ॥ ३४ ॥

६८७ ननु मूढस्य योगाभ्यासादात्मानुभवो भविष्यतीत्याशंक्य । नेत्याह—

६८८
**शुद्धं बुद्धं प्रियं पूर्णं निःप्रपंचं निरामयम् ।**
**आत्मानं तं न जानंति तत्राभ्यासपरा जनाः**

६८८] तत्र अभ्यासपराः जनाः आत्मानं तं न जानंति शुद्धं बुद्धं प्रियं पूर्णं निःप्रपंचं निरामयं ॥

६८९) तत्र जगति । अभ्यासपरा जनाः अज्ञानिनः । आत्मानं तं न जानंति ॥ कीदृशं । शुद्धं मायामलातीतं । अत एव बुद्धं स्वप्रकाशं । प्रियं सुखरूपं । पूर्णं । यतो निःप्रपंचं । अत एव निरामयं दुःखसंबंधरहितमित्यर्थः ॥ ३५ ॥

---

६९० इदमेव विवृणोति—

६९१
**नाप्नोति कर्मणा मोक्षं विमूढोऽभ्यासरूपिणा ।**
**धन्यो विज्ञानमात्रेण मुक्तस्तिष्ठत्यविक्रियः ३६**

६९१] विमूढः अभ्यासरूपिणा कर्मणा मोक्षं न आप्नोति धन्यः विज्ञानमात्रेण अविक्रियः मुक्तः तिष्ठति॥

६९२) विमूढः अनात्मज्ञः । अभ्यास-रूपिणा योगाभ्यासात्मकेन कर्मणा । मोक्षं नाप्नोति । " न कर्मणा न प्रजया न धनेन " इति श्रुतेः । धन्यो भाग्यवान् विरलो । विज्ञान-मात्रेण अविक्रियो निरस्ताविद्याकामकर्मा । अत एव मुक्तस्तिष्ठति ॥ ३६ ॥

००००००००००००००००००००००००००००००००

६९३ मुमुक्षुरपि मूढो ब्रह्म नाप्नोतीत्याह—

६९४
**मूढो नाप्नोति तद्ब्रह्म यतो भवितुमिच्छति ।**
**अनिच्छन्नपि धीरो हि परब्रह्मस्वरूपभाक् ३७**

६९४] मूढः यतः तत् ब्रह्म भवितुं इच्छति न आप्नोति हि धीरः अनिच्छन् अपि परब्रह्मस्वरूपभाक् ॥

६९५) मूढः अज्ञानी । यतः चित्तनिरोधादेव। ब्रह्म भवितुमिच्छति । ततो ब्रह्म नाप्नोति ॥ हि निश्चितं । धीरो ज्ञानी । मोक्षं अनिच्छन्नपि परब्रह्मस्वरूपभाक् । व्यवधानस्य निवृत्तत्त्वा-दित्यर्थः ॥ ३७ ॥

६९६ एतदेव स्पष्टयति—

निराधारा[६९७] ग्रहव्यग्रा मूढाः संसारपोषकाः ॥
एतस्यानर्थमूलस्य मूलच्छेदः कृतो बुधैः।३८।

६९७] मूढाः निराधाराः ग्रहव्यग्राः संसारपोषकाः बुधैः अनर्थमूलस्य एतस्य मूलच्छेदः कृतः ॥

६९८) मूढाः अज्ञानिनः । निराधारा ग्रहव्यग्राः केवलेन चित्तनिरोधेनैवाहं मोक्ष्यामीति निःकारणदुराग्रहव्यग्राः । प्रत्युत संसारपोषकाः संसारनिवर्तकज्ञानपराङ्मुखत्वात् ॥ बुधैः ज्ञानिभिः । अनर्थमूलस्य । एतस्य संसारस्य । मूलच्छेदः कृतः । संसारमूलभूताज्ञानस्य ज्ञानेन निवृत्तत्वादित्यर्थः ३८

६९९ किंच—

न[७००] शांतिं लभते मूढो यतः शमितुमिच्छति ॥
धीरस्तत्त्वं विनिश्चित्य सर्वदा शांतमानसः ३९

७००] मूढः यतः शमितुं इच्छति न शांतिं लभते धीरः तत्त्वं विनिश्चित्य सर्वदा शांतमानसः ॥

७०१) मूढः अज्ञानी । यतः चित्तनिरोधादेः । शमितुमिच्छति । न ततः शांतिं लभते ॥ धीरो विवेकी । तत्त्वं विनिश्चित्य शमितुमनिच्छन्नपि । स्वभावादेव सर्वदा शांतमानसो भवति । चेतोविकारहेतोरज्ञानस्य निवृत्तत्त्वादित्यर्थः ॥ ३९ ॥

ooooooooooooooooooooooooooooooooooo

७०२ किंच—

७०३क्वात्मनो दर्शनं तस्य यद्दृष्टमवलंबते ॥
धीरास्तं तं न पश्यंति पश्यंत्यात्मानमव्ययम् ४०

७०३] यद्दृष्टं अवलंबते तस्य आत्मनः दर्शनं क्व । धीराः तं तं न पश्यंति । अव्ययं आत्मानं पश्यंति ॥

७०४) यद्दृष्टं यस्य दृष्टं ज्ञातं । अवलंबते दृश्यं विषयीकरोति । तस्यात्मनो दर्शनं क्व । न क्वापीत्यर्थः ॥ धीराः ज्ञानिनः । तं तं तिमिरप्रदीपादिकं दृश्यपदार्थं । न पश्यंति । किंतु चिद्रूपं आत्मानं पश्यंति ॥ ४० ॥

क्व७०५ निरोधो विमूढस्य यो निर्बंधं करोति वै ॥
स्वारामस्यैव धीरस्य सर्वदाऽसावकृत्रिमः ४१॥

७०५] यः निर्बंधं वै करोति विमूढस्य क्व निरोधः । स्वारामस्य एव धीरस्य सर्वदा असौ अकृत्रिमः ॥

७०६) यः अज्ञानी । शुष्कचित्तनिरोधे निर्बंधं करोति । तस्य विमूढस्य क्व चित्त-निरोधः न क्वापि । अज्ञानिनां समाध्युपरमे पुनश्चित्तप्रसारात्॥ स्वारामस्यैव आत्मारामस्य । अत एव निश्चल-चित्तस्य । सर्वदाऽसौ चित्तनिरोधः अकृत्रिमः स्वाभाविकः । सर्वदा स्वात्मानुभवशालित्वात्४१॥

ooooooooooooooooooooooooooooooo

भा७०७वस्य भावकः कश्चिन्न किंचिद्भावकोऽपरः॥
उभयाभावकः कश्चिदेवमेव निराकुलः ॥४२॥

७०७] कश्चित् भावस्य भावकः । अपरः किंचित् न भावकः । कश्चित् उभयाभावकः एवं एव निराकुलः ॥

७०८) कश्चित् तार्किकादिः भावस्य

भावकः भावरूपं परमार्थतः सन् प्रपंच इति भाव-यते मन्यते इति भावस्य भावकः । अपरः शून्यवादी बौद्धः । न किंचिदस्तीति विभावयतीति न किंचिद्भावकः ॥ कश्चित् सहस्रेष्वेव कश्चि-दात्मानुभवशाली । उभयाभावकः सन् एवं उभयाः भावनेन एव । निराकुलः स्वस्थचित्त आस्ते इत्यर्थ-

oooooooooooooooooooooooooooooooo

७०९ "न किंचिदपि चिंतयेत्" इति भग-वद्वचनं ॥ सिद्धांतमभिप्रेत्याह—

शुद्धमद्वयमात्मानं भावयंति कुबुद्धयः ।
न तु जानंति संमोहाद्यावज्जीवमनिर्वृताः ४३

७१०] कुबुद्धयः शुद्धं अद्वयं आत्मानं भावयंति । न तु जानंति । संमोहात् यावजीवं अनिर्वृताः ॥

७११) कुबुद्धयः मूढबुद्धय एव । शुद्धं निर्मलं । अद्वयं द्वैतवर्जितं । आत्मानं अतन-शीलं व्यापकं । भावयंति चिंतयंति । न तु जानंति साक्षात्कुर्वंति । कुतः । संमोहात्

निर्मलत्वस्य कल्पितमलसापेक्षत्वादद्वयस्य कल्पितद्वैतसापेक्षत्वात् आत्मत्वस्य च कल्पितानात्मसापेक्षत्वात्सापेक्षरूपचिंतनेन तु मोहानिवृत्तेः यतो न जानंति । अत एव यावज्जीवमनिर्वृताः परमसंतोषरहिताः। संतोषस्य ज्ञानैकलभ्यत्वादित्यर्थः ४३

---

७१२ इदमेव विशदयति—

७१३ मुमुक्षोर्बुद्धिरालंबमंतरेण न विद्यते ।
निरालंबैव निष्कामा बुद्धिर्मुक्तस्य सर्वदा ४४

७१३] मुमुक्षोः बुद्धिः आलंबं अंतरेण न विद्यते । मुक्तस्य निष्कामा बुद्धिः सर्वदा निरालंबा एव ॥

७१४) मुमुक्षोः अनधिगतात्मसाक्षात्कारस्य। बुद्धिः । स विशेषालंबनं अंतरेण । न विद्यते साक्षात्काराभावात् ॥ मुक्तस्य जीवन्मुक्तस्य । अतएव मुक्तावपि निष्कामा बुद्धिः । सर्वदा निरालंबैव निर्विशेषात्मानुभवरूपैव । सविशेषादिपरित्याग एवात्मानुभवः ॥ ४४ ॥

७१५ निरोधोऽपि विषयस्फूर्तिचकितैरेवानुष्ठीयते न तु विशेषज्ञैरित्याह——

विषयद्वीपिनो वीक्ष्य चकिताः शरणार्थिनः ।
विशंति झटिति क्रोडं निरोधैकाग्रसिद्धये॥४५॥

७१६] विषयद्वीपिनः वीक्ष्य चकिताः शरणार्थिनः निरोधैकाग्रसिद्धये झटिति क्रोडं विशंति ॥

७१७) विषयद्वीपिनो विषयव्याघ्रान् वीक्ष्य "शार्दूलद्वीपिनौ व्याघ्रे" इत्यमरः । भीताः शरणार्थिनः स्वात्मरक्षणार्थिनो । मूढा एव। निरोधसिद्धये एकलक्ष्यवृत्तिसिद्धये वा । झटिति शीघ्रं । क्रोडं कंदरांतःप्रदेशं । विशंति न तु ज्ञानिन इत्यर्थः ॥ ४५ ॥

७१८ वासनात्याग एव विषयभयनिवृत्ति-
रित्याह—

७१९
निर्वासनं हरिं दृष्ट्वा तूष्णीं विषयदंतिनः ॥
पलायंते न शक्तास्ते सेवंते कृतचाटवः॥४६॥

७१९] निर्वासनं हरिं दृष्ट्वा विषयदंतिनः न शक्ताः तूष्णीं पलायंते कृतचाटवः ते सेवंते ॥

७२०) निर्वासनो यः पुरुषस्तल्लक्षणं । हरिं सिंहं । दृष्ट्वा विषयदंतिनो न शक्ताः संतः तूष्णीं मौनं यथा स्यात्तथा । पलायंते । कृतचाटवः कृतप्रियवचना इव तं निर्वासनं ईश्वराकृष्टाः स्वयमागत्य सेवंत इत्यर्थः ॥ ४६ ॥

०००००००००००००००००००००००००००००

७२१
न मुक्तिकारिकां धत्ते निःशंको युक्तमानसः
पश्यन्शृण्वन् स्पृशन्जिघ्रन्नश्नन्नास्ते यथासुखम्

७२१] निःशंकः युक्तमानसः मुक्तिकारिकां न धत्ते पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् यथासुखं आस्ते ॥

७२२) निःशंको गतसंशयः । अत एव युक्तमानसो निश्चलमानसः ज्ञानी । मुक्तिकारिकां यमनियमादिक्रियामाग्रहात् न धत्ते । किं तर्हि । कर्तृत्वाध्यासरहितत्वात् यथासुखं आत्मसुखमनतिक्रम्य । लोकदृष्ट्या ईक्षणादिक्रियां कुर्वन् आस्ते इत्यर्थः ॥ ४७ ॥

---

७२३ वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः ।
नैवाचारमनाचारमौदास्यं वा प्रपश्यति ॥४८॥

७२३] वस्तुश्रवणमात्रेण शुद्धबुद्धिः निराकुलः आचारं अनाचारं औदास्यं वा न एव प्रपश्यति ॥

७२४) वस्तुनश्चिदात्मनः श्रवणमात्रेण जाता या शुद्धबुद्धिः अखंडात्मसाक्षात्कारस्ततो निराकुलः स्वस्वरूपस्थः पुरुषः । आचारं क्रियानुष्ठानं । अनाचारं अशुभं कर्म वा । औदास्यं नैष्कर्म्यं उभयत्रापि ताटस्थ्यं वा । एतत्त्रयमपि नैव प्रपश्यति । आत्मस्थत्वादित्यर्थः ॥ ४८ ॥

[७२५] यदा यत्कर्तुमायाति तदा तत्कुरुते ऋजुः ।
शुभं वाप्यशुभं वापि तस्य चेष्टा हि बालवत् ४९

७२५] यदा यत् शुभं वा अशुभं अपि कर्तुं आयाति तदा तत् कुरुते ऋजुः हि तस्य चेष्टा वा अपि बालवत्।

७२६) यदा यत् शुभं नैष्कर्म्यं वा अशुभं कर्म वा । कर्तुमायाति । तत् लोकदृष्ट्या प्रारब्धवशात् कुरुते । ऋजुः आग्रहरहितः । हि यतः कारणात् । तस्य चेष्टा बालवत् प्रारब्धमात्रायत्ता न रागद्वेषाधीना ॥ ४९ ॥

ooooooooooooooooooooooooooooooo

[७२७] स्वातंत्र्यात्सुखमाप्नोति स्वातंत्र्याल्लभते परम्।
स्वातंत्र्यान्निर्वृतिं गच्छेत्स्वातंत्र्यात्परमं पदं ५०

७२७] स्वातंत्र्यात् सुखं आप्नोति स्वातंत्र्यात् परं लभते स्वातंत्र्यात् निर्वृतिं गच्छेत् स्वातंत्र्यात् परमं पदम् ॥

[७३१] उच्छृंखलाप्यकृतिका स्थितिर्धीरस्य राजते ।
न तु सस्पृहचित्तस्य शांतिर्मूढस्य कृत्रिमा ५२

७३१] धीरस्य अकृतिका उच्छृंखला अपि स्थितिः राजते । सस्पृहचित्तस्य मूढस्य तु कृत्रिमा शांतिः न ॥

७३२) धीरस्य वीतस्पृहस्य अकृतिका अकृत्रिमा। उच्छृंखलापि शांतिरहितापि स्थितिः। शोभते । सस्पृहचित्तस्य मूढस्य तु कृत्रिमा शांतिः न शोभते इत्यर्थः ॥ ५२ ॥

---

७३३ निरस्तकल्पनानां ज्ञानिनां तु भोगतच्छांत्योरप्यनाग्रह इत्याह—

[७३४] विलसंति महाभोगैर्विशंति गिरिगव्हरान् ।
निरस्तकल्पना धीरा अबद्धा मुक्तबुद्धयः ५३

७३४] निरस्तकल्पनाः धीराः महाभोगैः विलसंति गिरिगव्हरान् विशंति अबद्धाः मुक्तबुद्धयः ॥

७३५) निरस्तकल्पना धीराः ज्ञानिनः कदाचित्प्रारब्धवशात् महाभोगैः विलसंति क्रीडंति । कदाचित्प्रारब्धवशात् गिरिगव्हरान् पर्वतवनानि विशंति । कीदृशाः । अनद्धाः आसक्तिरहिताः । यतो मुक्तबुद्धयः । कर्तृत्वाध्यासरहितबुद्धय इत्यर्थः ॥ ५३ ॥

ooooooooooooooooooooooooooooooo

७३६
श्रोत्रियं देवतां तीर्थमंगनां भूपतिं प्रियम् ।
दृष्ट्वा संपूज्य धीरस्य न कापि हृदि वासना॥

७३६] धीरस्य श्रोत्रियं देवतां तीर्थं संपूज्य अंगनां भूपतिं प्रियं दृष्ट्वा हृदि का अपि वासना न ॥

७३७) धीरस्य ज्ञानिनः श्रोत्रिय-देवता-तीर्थ-पूजने सति हृदि कापि वासना धर्मार्थ-कामवासना न जायते । तथा । अंगनां भूपतिं प्रियं पुत्रादिकं च दृष्ट्वा कापि काम्यपदार्थवासना न जायते । सर्वत्र समबुद्धित्वादित्यर्थः ॥ ५४ ॥

[७३७]भृत्यैः पुत्रैः कलत्रैश्च दौहित्रैश्चापि गोत्रजैः ।
विहस्य धिकृतो योगी न याति विकृतिं मनाक्

७३८] भृत्यैः पुत्रैः कलत्रैः च दौहित्रैः च अपि गोत्रजैः विहस्य धिकृतः योगी मनाक् विकृतिं न याति॥

७३९) भृत्यादिभि-र्विहस्य उपहस्य धिकृतः तिरस्कृतो योगी मनाक् किंचिदपि । विकृतिं चित्तक्षोभं न याति । रागद्वेषहेतोर्मोहस्याभावादित्यर्थः ॥ ५५ ॥

ooooooooooooooooooooooooooooooo

[७४०]संतुष्टोऽपि न संतुष्टः खिन्नोऽपि न च खिद्यते ।
तस्याश्चर्यदशां तां तां तादृशा एव जानते५६

७४०] संतुष्टः अपि संतुष्टः न । च खिन्नः अपि न खिद्यते तां तां आश्चर्यदशां तस्य तादृशाः एव जानते ॥

७४१) लोकदृष्ट्या संतोषादियुक्तोऽपि वस्तुतः तद्रहितः । तस्य ज्ञानिनः । तां तां आश्चर्यदशां तादृशा एव ज्ञानिन एव जानते ॥५६॥

[७४१]कर्तव्यतैव संसारो न तां पश्यंति सूरयः ।
शून्याकारा निराकारा निर्विकारा निरामयाः॥

७४२] कर्तव्यता एव संसारः सूरयः तां न पश्यंति शून्याकाराः निराकाराः निर्विकाराः निरामयाः ॥

७४३) कर्तव्यतैव ममेदं कर्तव्यमिति कार्यसंकल्प एव । संसारः तद्धेतुत्वात् । सूरयो ज्ञानिनः तां कर्तव्यतां। न पश्यंति न संकल्पयंति । संकल्पमात्ररहितत्वात् । कीदृशाः सूरयः । शून्ये सर्वकार्यक्षये तथा वर्तमानघटाद्याकारे व्याकृते आकारः आभासो विश्वं येषां ते शून्याकाराः. घटाद्याकाराः । निराकाराः अत एव । निर्विकाराः समा आत्मदर्शिनः। अत एव निरामयाः संकल्पोपप्लवरहिता इत्यर्थः ॥ ५७.॥

अकुर्वन्नपि संक्षोभाद्व्यग्रः सर्वत्र मूढधीः ।
कुर्वन्नपि तु कृत्यानि कुशलो हि निराकुलः ५८

७४४] अकुर्वन् अपि मूढधीः सर्वत्र संक्षोभात् व्यग्रः । कृत्यानि कुर्वन् अपि तु कुशलः हि निराकुलः ॥

७४५) अकुर्वन्नपि मूढधीः । सर्वत्र शून्याकारनिराकारेषु । संक्षोभात् संकल्पात् । व्यग्रः भवति । लोकदृष्ट्या कृत्यानि कुर्वन्नपि । कुशलो विद्वान् । हि निश्चितं । निराकुलो निश्चलचित्तः । आत्मारामत्वादेवेत्यर्थः ॥ ५८ ॥

सुखमास्ते सुखं शेते सुखमायाति याति च ।
सुखं वक्ति सुखं भुंक्ते व्यवहारेऽपि शांतधीः ५९

७४६] व्यवहारे अपि शांतधीः सुखं आस्ते । सुखं शेते । सुखं आयाति च याति । सुखं वक्ति सुखं भुंक्ते ॥

७४७) प्राक्तनवशात् व्यवहारे जायमाने । शांतधीः आत्मनिष्ठबुद्धिर्विद्वान् । आत्म-सुखं

अनतिक्रम्यैव आस्ते उपविशति । शेते आ-
गच्छति गच्छति वक्ति भुंक्ते । सर्वेंद्रियव्यापारं
करोतीत्यर्थः ॥ ५९ ॥

७४८) ननु ज्ञानिनोऽपि व्यवहारेषु कथं न
खेद इत्यत आह—

**[७४९] स्वभावाद्यस्य नैवार्तिर्लोकवद्व्यवहारिणः ।**
**महाह्रद इवाक्षोभ्यो गतक्लेशः सुशोभते॥६०॥**

७४९] व्यवहारिणः यस्य लोकवत् आर्तिः न एव ।
स्वभावात् गतक्लेशः महाह्रदः इव अक्षोभ्यः सुशोभते ॥

७५०) व्यवहारिणः अपि यस्य ज्ञानिनो
लोकवत् प्राकृतजनवत् । आर्तिः खेदो न
जायते । कुतः स्वभावात् । साक्षात्कृतानंदस्य
स्वभावादात्मसामर्थ्यादित्यर्थः । स गतक्लेशो
ज्ञानी महाह्रद इव अक्षोभ्यो निर्विकारः
सुशोभते ॥ ६० ॥

७५१
निवृत्तिरपि मूढस्य प्रवृत्तिरुपजायते ।
प्रवृत्तिरपि धीरस्य निवृत्तिफलभागिनी ॥६१॥

७५१] मूढस्य निवृत्तिः अपि प्रवृत्तिः उपजायते । धीरस्य प्रवृत्तिः अपि निवृत्तिफलभागिनी ॥

७५२) लोकदृष्ट्या प्रतीयमानापि मूढस्य बाह्येंद्रियव्यापाराणां निवृत्तिः । प्रवृत्ति-स्वरूपैव जायते । अहंकारादीनामनिवृत्तत्वात् । धीरस्य ज्ञानिनः लोकदृष्ट्या प्रारब्धवशात् प्रतीयमानापि प्र-वृत्तिरपि निवृत्तिफलभागिनी मुक्तिपर्यवसायिनी स्यात् । अहं करोमीत्यभिमानाभावादित्यर्थः ॥६१॥

०००००००००००००००००००००००००००००००

७५३
परिग्रहेषु वैराग्यं प्रायो मूढस्य दृश्यते ।
देहे विगलिताशस्य क्व रागः क्व विरागता६२

७५३] मूढस्य परिग्रहेषु प्रायः वैराग्यं दृश्यते । देहे विगलिताशस्य क्व रागः क्व विरागता ॥

७५४) मूढस्य । देहाभिमानिनस्तत्संबंधितया परिगृहीतेषु धनवेश्यादिषु । प्रायो बाहुल्येन

वैराग्यं दृश्यते । देहे विगलिताशस्य क्व तत्संबंधिनि पुत्रगृहादौ रागः स्यात् । क्व च शत्रुव्याघ्रादौ विरागता स्यात् । देहे रागविराग-योरभावे तत्संबंधिषु रागविरागयोर्वक्तुमशक्यत्वा-देवेत्यर्थः ॥ ६२ ॥

०००००००००००००००००००००००००००००

७५५ भावनाभावनासक्ता दृष्टिर्मूढस्य सर्वदा ।
भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी ६३

७५५] मूढस्य दृष्टिः सर्वदा भावनाभावनासक्ता । स्वस्थस्य तु सा भाव्यभावनया अदृष्टिरूपिणी ॥

७५६) मूढस्य दृष्टिः सर्वदा भावनायां अभावनायां वा सक्ता । अहं भावनां करोमि । यद्वाहमभावनां करोमीत्यहंकारात् स्वस्थस्य आत्मनिष्ठस्य तु सा दृष्टिः । भाव्यभावनया दृश्यचिंतया उपलक्षितापि अदृष्टिरूपिणी दृश्य-दर्शनरहितरूपैव स्यात् । अहं करोमीत्यभिमाना-भावादित्यर्थः ॥ ६३ ॥

७५७ ननु सादृश्यभावने क्रियमाणेऽपि तस्य दृष्टिः कथं दृश्यानालंबिनीत्याशंक्य । निष्काम-त्वादित्याह—

[७५] सर्वारंभेषु निष्कामो यश्चरेद्बालवन्मुनिः ।
न लेपस्तस्य शुद्धस्य क्रियमाणेऽपि कर्मणि ॥

७५८] यः बालवत् निष्कामः मुनिः सर्वारंभेषु चरेत् तस्य शुद्धस्य कर्मणि क्रियमाणे अपि न लेपः ॥

७५९) यो बालवत् निष्कामः सन् प्राक्तनवशात् । सर्वारंभेषु चरति प्रवर्तते । तस्य शुद्धस्य अहंकारमलवर्जितस्य । कर्मणि क्रियमाणे न लेपो न कर्तृता स्यात् । अहंकाराभावादित्यर्थः ॥ ६४ ॥

०००००००००००००००००००००००००००००००००

७६० एवंविधोऽतिधन्य इत्याह—

[७६] स एव धन्य आत्मज्ञः सर्वभावेषु यः समः।
पश्यन्शृण्वन्स्पृशन् जिघ्रन्नश्नन्निस्तर्षमानसः॥

७६१] सः एव आत्मज्ञः धन्यः यः सर्वभावेषु समः निस्तर्षमानसः पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् ॥

७६२) स एव आत्मज्ञः धन्य एव नान्यः। यः सर्वभावेषु समः आत्मबुद्धिः अत एव । निस्तर्षमानसः वितृष्णचित्तो भवति । किं कुर्वन् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् अपि६५

०००००००००००००००००००००००००००००००

७६३ तस्यैव धन्यत्वे युक्तिमाह—

७६४ क्व संसारः क्व चाभासः क्व साध्यं क्व च साधनं।
आकाशस्येव धीरस्य निर्विकल्पस्य सर्वदा६६

७६४] आकाशस्य इव सर्वदा निर्विकल्पस्य धीरस्य संसारः क्व आभासः क्व च साध्यं क्व च साधनं क्व ॥

७६५) धीरस्य ज्ञानिनः । अत एव सर्वदा विकल्परहितस्य संसारः प्रपंचः क्व । अत एव तत्प्रतिभासश्च क्व। अत एव साध्यं स्वर्गादिकं क्व। अत एव साधनं यागादिकं क्व। न क्वापीत्यर्थः६६

७६६ स जयत्यर्थसंन्यासी पूर्णस्वरसविग्रहः ।
अकृत्रिमोऽनवच्छिन्ने समाधिर्यस्य वर्तते ॥६७

७६६] सः अर्थसंन्यासी पूर्णस्वरसविग्रहः जयति यस्य अकृत्रिमः अनवच्छिन्ने समाधिः वर्तते ॥

७६७) स अर्थसंन्यासी । दृष्टादृष्टप्रयोजन-शून्यः । यतः पूर्णस्वरसः पूर्णस्वभावो विग्रहः स्वरूपं यस्य स पूर्णस्वरसविग्रहो जयति सर्वोत्कर्षेण वर्तते । सः कः । यस्य अकृत्रिमः स्वाभाविकः अनवच्छिन्ने पूर्णस्वरूपे समाधिः वर्तते स जयतीत्यर्थः ॥ ६७ ॥

७६८ ज्ञाततत्त्वस्य तु सर्वत्र निराकांक्षत्व-मेव मुख्यं लक्षणमित्याह—

७६९ बहुनात्र किमुक्तेन ज्ञाततत्त्वो महाशयः ।
७७२ भोगमोक्षनिराकांक्षी सदा सर्वत्र नीरसः॥६८।

७६९] अत्र बहुना उक्तेन किं ज्ञाततत्त्वः महाशयः॥

७७०) अत्र ज्ञानिनि बहुना उक्तेन लक्षणेन

किं प्रयोजनं । यतो ज्ञाततत्त्वो महाशयः ॥

७७१ महाशयत्वं विवृणोति—

७७२] भोगमोक्षनिराकांक्षी सदा सर्वत्र नीरसः ॥

७७३) भोगमोक्षयोः फलयोः निराकांक्षी अत एव सदा सर्वत्र भोगमोक्षसाधनेषु नीरसः निरनुरागः ॥ ६८ ॥

ooooooooooooooooooooooooooooooooo

